ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

कार्तिकमासः
वर्षम्–६८
प्रथमोऽङ्कः
विक्रमाब्दः २०७३
युगाब्दः ५११८
५ नवम्बर २०१६

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



लक्ष्मी-गणेश-पूजाभिः सर्वतो दीपपंक्तिभिः।
हर्षोत्साहसमारम्भैर्मान्यो दीपमहोत्सवः॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | पञ्चदिवसीयो दीपमालिकोत्सवः | प्रधानसम्पादकः | ७ |
| ५ | वस्त्वलङ्कारव्यङ्ग्यचर्वणायां चित्तदशा | डॉ. कमलकान्तबालाणः | १२ |
| ६ | राष्ट्रीय-शब्दस्य पाणिनीयता निर्बाधा | डॉ. रामशंकर भट्टाचार्यः | १५ |
| ७ | दशरथद्विवेदिरचितजानकीजीवनमहाकाव्यस्य... | डॉ. प्रहलादकुमारशर्मा | १७ |
| ८ | ज्योतिषशास्त्रे स्त्रीसम्बद्धरोगविमर्शः | वन्दना शर्मा | १८ |
| ९ | किरातार्जुनीयमहाकाव्ये अर्थशास्त्रीयविषयाः | डॉ. हेमराजशर्मा | २० |
| १० | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २३ |
| ११ | बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | २५ |
| १२ | प्रेरकप्रसङ्गशतकम् | मा. श्रीमती आराधना धर्माधिकारी | २५ |
| १३ | भारतराष्ट्रे षोडशसंस्काराणां परम्परा | बुद्धिप्रकाशजाँगिड़ | २६ |
| १४ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २९ |
| १५ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |
| २० | संस्कृतसमाचारः | - | ३४ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामाशर्मा

सहसम्पादकौः
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

लक्ष्मीपूजनमाचरन्ति विबुधाः मासे शुभे कार्तिके,
नेतारोऽपि सदैव यां भगवतीं ध्यायन्ति निर्वाचने।
मन्त्रित्वे मम स्यात् प्रधानपदवीत्याशाभिभूताः सदा,
पूज्यां सर्वजनैः सुतां जलनिधेर्वन्दामहे तां रमाम्।।

## मासावतरणम्

गङ्गाम्भः परिमेलयन्ति विमलं पात्रे स्थिते वारिणि,
तेन स्नान्ति नराः रवेरुदयतः प्राक् प्रीतये श्रीहरेः।
राधामाधवयोः स्तुतिं सुमधुरां कुर्वन्ति नृत्यन्ति च,
ऊर्जे मासि च तीर्थपुण्यममलं भक्त्या लभन्ते बुधाः।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

कार्तिकमासः
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2073
नवम्बर, 2016
अङ्कः - 1
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

# सम्पादकीयम्

...✍ पं. प्यारेमोहनशर्मा

महतो हर्षस्यायमवसरो यद्दीपावलिपर्वतः संस्कृत-मासपत्रिकेयमष्टषष्टितमे वर्षे प्रवेक्ष्यति। नववर्षप्रवेशावसरे वयं तान् सश्रद्धं स्मरामो येषां प्रयत्नैः पत्रिकेयं समारब्धा। सर्वतः प्रथमं बाबासाहब आप्टेमहोदयेभ्यः प्रणामाञ्जलीन् समर्पयामो येषां प्रेरणया दादाभाई गिरिराजशास्त्रिणः संस्कृतपत्रिकाप्रकाशनाय तत्परा अजायन्त। यद्यपि 1950 ई. वर्षे संस्कृतपत्रिकायाः प्रकाशनमतीव कठिनं कार्यमविद्यत। भारतीपत्रिकातः पूर्वं जयपुरात् संस्कृतरत्नाकरोऽत्रत्यैर्विद्वद्भिः प्राकाशिष्ट। महामहोपाध्याय पं. गिरिधरशर्मचतुर्वेदी, पं. सूर्यनारायण-शास्त्री, कविशिरोमणिभट्टश्रीमथुरानाथशास्त्रीप्रभृतभिर्मिलित्वा संस्कृतरत्नाकरः प्राकाश्यत। पञ्चदशवर्षाणि यावत् तत् पत्रं नैरन्तर्येण समये प्राकाश्यमुपगतम्। संस्कृतरत्नाकरो यावत् जयपुरात् प्रकाशितस्तावन्निरन्तरं तस्य प्रकाशनमभूत्। परन्तु तदनन्तरं वारणसेयैर्विद्वद्भिः काशीतः प्रकाशनं प्रारब्धम्। तस्मान्नगरादपि षड्वर्षाणि यावत् पत्रं निरन्तरं प्रकाशमुपगतम्। परन्तु न दीर्घायुष्यं तेन समुपलब्धम्।

अस्तु 1950 वर्षतः संस्कृतमासपत्रिकायाः अस्या जयपुरात् प्रकाशनं समारब्धम्। बाबासाहबआप्टेमहोदया गिरिराजशास्त्रिणे प्रबन्धसम्पादकस्य दायित्वमयच्छन्। प्रारम्भे जयपुरे राष्ट्रीय-स्वयंसवेक-संघकार्यालये जयपुरीयविदुषामेका संगोष्ठी समायोजिता। तत्र विद्वांसोऽवदन् यत् संस्कृतपत्रप्रकाशनमतीव दुष्करम्। यतोहि न मिलन्ति मुद्रकाः अक्षरसंयोजकाः संशोधकाः, धनदातारो ग्राहकाः अध्येतारश्च। अतः कथं प्रकाशनं भविष्यति? आङ्गलभाषामेव छात्राः पठन्ति। संस्कृताध्येतारो मुष्टिमेया एव विद्यन्ते। विद्वांसो न लिखन्ति। प्रौढा विद्वांसोऽपि कुशला अध्यापकाः अपि ग्रन्थग्रन्थिविमोचकाः शास्त्रेषु कुशला विद्यन्ते परन्तु न लिखन्ति। सर्वेषां कथनं श्रुत्वा बाबासाहब आप्टेमहोदया अवदन् भवन्तस्तु केवलं पत्रिकाप्रकाशने स्ववैदुष्यानुसारं लेखान् लिखन्तु। अन्यत् सर्वमहं साधयिष्यामि। जाते दृढे निश्चये दीपावलिपर्वणि 1950 वर्षे पत्रिका प्राकाशिष्ट।

पत्रिकायाः सम्पादकः को भवेत् इति प्रश्ने समपस्थिते प्रबन्धसम्पादकमहोदयाः सुप्रसिद्धविदुषे श्री सुरजनदास-स्वामिने सम्पादकदायित्वमङ्गीकर्तुं प्रार्थयन्। स्वामि-महाभागा दर्शनन्यायव्याकरणसाहित्यस्य प्रौढाः विद्वांसोऽविद्यन्त। सम्पादककार्यमप्यजानन्। ते प्रार्थनामङ्गीचश्क्रुः। स्वामिनः सुरजनदासमहोदयाःभारत्याः प्रथमप्रधानसम्पादकपदमलमकार्षुः। जयनारायणव्यास-जोधपुरविश्वविद्यालयस्य संस्कृतविभागाध्यक्षपदात् सेवानिवृत्ताय दिवंगताय श्रीसुरजनदासस्वामिमहाभागाय नववर्षप्रवेशावसरे सश्रद्धं प्रणामाञ्जलीन् समर्पयामः।

ततश्च भारत्याः सम्पादकपदं कविशिरोमणयः साहित्यशास्त्रस्य विलक्षणा विद्वांसः संस्कृतकाव्येषु नवाचारसमारब्धकाः ग्रन्थग्रन्थिविमोचनकुशलाः भट्टश्रीमथुरानाथशास्त्रिणः प्रधानसम्पादकपदमलञ्चक्रुः। प्रसिद्धसंस्कृतेतिहासलेखको बलदेवोपाध्यायो भट्ट-महोदयानां वैदुष्यमादाय संस्कृतसाहित्यस्य वर्तमानकालः श्रीमथुरानाथकाल इत्यजूघुषत्। भवद्भिर्जयपुरवैभव-प्रभृतीनि काव्यानि, इयं तु किन्तोः कुटिलताप्रभृतीनि गद्याख्यानानि हिन्दीभाषायाश्छन्दःसु रुचिराणि मुक्तकानि विरचितानि। भवन्तः सम्पादनकलाकुशला अविद्यन्त अत एव प्रतिमासं समये प्रकाशिता भवेत् पत्रिकाएतदर्थं स्तम्भरचना भवद्भिस्तत्र कृता। विद्वद्भ्यः स्तम्भविशेषाय लेखप्रेषणाय च न्यवेदयन्। एतेन प्रतिमासं पत्रिका समये प्राकाशिष्ट। भाषा अपि सरला भवेत् येन संस्कृता-ध्येतारश्छात्रा अपि पत्रिकापठने रुचिमन्तो भवेयुरित्यपि भवद्भिर्लेखका निवेदिताः। भवतां सम्पादनकार्ये देवर्षिकलानाथशास्त्रिणोऽपि साहाय्यमकार्षुः। संस्कृत-महाविद्यालयस्य साहित्यविभागाध्यक्षपदात् सेवानिवृत्ताय

दिवंगताय श्रीमते भट्टमथुरानाथशास्त्रिणे नववर्षप्रवेशावसरे सश्रद्धं प्रणामाञ्जलीन् समर्पयामः। ततः किञ्चित्कालपर्यन्तं धर्मशास्त्राचार्याः श्रीप्रभाकरशास्त्रिणः पितृचरणाः श्रीमन्तो वृद्धिचन्द्रशास्त्रिणः सम्पादनमकार्षुः। संस्कृतमहाविद्यालयस्य धर्मशास्त्रविभागाध्यक्षपदात् सेवानिवृत्ताय, दिवङ्गताय श्रीमते भारतीपरिवारः सादरं श्रद्धासुमनानि समर्पयति।

तदनन्तरम् आशुकवयः श्रीहरिशास्त्रिणः संस्कृत-मासपत्रिकां भारतीं समपीपदन्। एते कवितानिर्माणे सरसरचनाकरणे प्रसिद्धिमलभन्त। वाममार्गोपासकाः इमे तन्त्रशास्त्रेऽपि निष्णाता अविद्यन्त। अखिलभारतीय-तान्त्रिकसम्मेलनस्याध्यक्षपदं वाराणस्यां समायोजिते वृहत्तमतान्त्रिकसभायामलञ्चक्रुः। जगदम्बा भगवती नैकशो भवते प्रत्यक्षदर्शनं प्रायच्छत्। पत्रिकायां मङ्गलाचरणपद्यम् मासावतरणञ्च प्रतिमासं भवन्तोऽलेखन्। संस्कृतमहाविद्यालयस्य साहित्यशास्त्रव्याख्यातृपदात् सेवानिवृत्ताय स्वर्गताय सुधर्मासभायां सुशोभिताय भवते भारतीपरिवारः सादरं श्रद्धापुष्पाणि समर्पयति।

श्रीशास्त्रिणोऽनन्तरं पण्डितदीनानाथमधुपो भारतीं समपीपदत्। इमे न्यायशास्त्रस्य विद्वांसः समभूवन् साहित्यशास्त्रस्यापि भवन्तः समुद्भटा विद्वांसोऽविद्यन्त। भवन्तः काव्यरचनाकुशला आसन्। सरसकाव्यनिर्मातार इमे प्रतिमासं मङ्गलाचरणमासावतरणं चालेखिषुः। भवन्तः स्वयमेवाक्षरसंशोधनमप्यकार्षुः। संस्कृतमहाविद्यालयस्य व्याख्यातृपदात् सेवानिवृत्ताय दिवंगताय श्रीदीनानाथाय भारतीपरिवारः सादरं श्रद्धासुमनानि समर्पयति।

मधुपमहोदयानन्तरं राष्ट्रपतिसम्मानिताः साहित्याचार्याः चलायमानसंस्कृतवाङ्मयकोषाः अस्मद्गुरुवर्याः मान्याः पं. जगदीशाचार्या भारत्याः प्रधानसम्पादक-पदमलञ्चक्रुः। महानुभावा इमे सुप्रसिद्धस्य पं. वीरेश्वरशास्त्रिणः शिष्या अवर्तन्त। वीरेश्वरशास्त्रिद्राविडाः शब्दशास्त्रे विलक्षणविचक्षणाः विद्वांसोऽवर्तन्त। द्राविडमहोदयाय तेषां गुरवो वाराणसेयाः योगेश्वर-शास्त्रिणः सर्वाणि शास्त्राणि स्वान्तेवासिशरीर-मसकृन्निजपाणिपद्मेन परामृशन्तोऽनेकशः स्वाध्यात्म-चिन्तनसंचितज्ञाननिधिं सश्चेक्रमिषुः। तत्क्षणं द्राविड-शास्त्रिणोऽन्वभूवन् यद् वपुषः प्रत्येकप्रतीक-परमाणु-रुद्बुद्धतां गत इति। ततः प्रभृति अनधीतग्रन्थस्य विषयाकलने तदीयदुरूहदुर्ज्ञेया अपि पङ्क्तयोऽनायासमेव मनीषायां प्रतिफलिता इवाविद्यन्त। पण्डित-जगदीशाचार्याणां पितृचरणाः बिहारीलालशास्त्रिणोऽपि साहित्यवेदान्तविषयद्वये आचार्या आसन् अत एव 'डबलाचार्य' नाम्ना प्रसिद्धिमलभन्त। ते स्वपुत्रं जगदीशं व्याकरणमध्येतुं द्रविडशास्त्रिणः समीपं गन्तुमादिशन्। द्रविडशास्त्रिणः कठिनपरीक्षां नीत्वा तदनन्तरमेवाध्यापिपन्। साहित्याचार्यपरीक्षोत्तरणानन्तरं ते जगदीशाचार्यं सर्वाणि शास्त्राणि अपाठयन्। अत एव पं. जगदीशाचार्याः विलक्षणं वैदुष्यमवापुः। एते नैकवर्षाणि यावत् भारतीं समपीपदन्। स्वीयसम्पादकीये इमे धर्मशास्त्रसम्बद्धं लेखमलेखिषुः। अक्षरसंशोधनमपि स्वयमेवाकार्षुः।

पं. रामगोपालशास्त्रिणो धर्मशास्त्राचार्याः एतेषां सहायकाः सम्पादका अभूवन्। महानुभावा इमेऽपि संस्कृतव्याकरणशास्त्राधिकारिणो विद्वांसः अवर्तन्त। मङ्गलाचरणम् मासावतरणञ्चेमेऽलेखिषुः।

नैकवर्षाणि यावत् भारतीपत्रिकासम्पादकाय वनस्थलीविद्यापीठस्य मानदाचार्यपदात् सेवानिवृत्ताय दिवंगताय गुरुवार्याय श्रीजगदीशाचार्याय सश्रद्धं सभक्तिकं श्रद्धासुमनानि समर्पयामः। सहसम्पादकाय दिवंगताय श्री रामगोपालशास्त्रिणेऽपि सादरं पुष्पाञ्जलिं समर्पयामः।

श्रीवाणी अलङ्करणविभूषिताः संस्कृतसुधी सम्मानेन सम्मानिताः विद्वद्गोष्ठ्यां प्राथम्येन सहकृताः नैकभाषा-भिज्ञाः नवीनतमज्ञाननिधयः संस्कृते नवशब्दनिर्माणनिपुणाः सद्यो निवेदिताः पूर्वमपरिचितविषयप्रतिपादने विलक्षण-विचक्षणाः कमपि विषयमधिकृत्य संभाषणकुशलाः नानाकाव्यप्रणेतारो दूरदर्शनमाध्यमेन शतशो वार्ताः-प्रसारका आकाशवाणीतो नैकसंवादप्रणेतारः सम्पूर्णभारते

विद्वद्भिः समाहूताः अस्माकं पत्रिकायाः प्रधानसम्पादकाः मान्या देवर्षिकलानाथशास्त्रिणो दीपावलिपर्वणि भारतीपरिवारद्वारा सादरं सम्मान्यन्ते। भवते दीर्घायुष्यं मङ्गलञ्च कामयते।

भारत्याः नारीस्तम्भलेखिका डा. राजेश्वरीभट्टमहोदया विंशतिवर्षेभ्यो निरन्तरं भारत्यै संस्कृते नारीमहत्त्वप्रदर्शकं हिन्दी अनुवादसहितं लेखं लिखति। संस्कृतभाषायां भवत्या असाधारणोऽधिकारः। लालबहादुरशास्त्री महाविद्यालये चिरमाचार्यपदमलञ्चकार। भवत्या अध्यापनवैशिष्ट्येन भवत्याः कक्षायां शतशश्छात्राः संस्कृतं समनोयोग- मध्यगीषत। भवत्या स्वपत्युः डा. गङ्गाधरभट्टस्मृतौ राजगङ्गा-चरेटेबलनाम्ना न्यासः संस्थापितः। न्यासे भवत्या स्वकीयेन धनेन सम्प्रति कोटिरूप्यकाणि सन्निहितानि। भवती स्वगृहेऽपि बालकानध्यापयति। अनेक- निर्धनानां बालकानां शिक्षणशुल्कं प्रयच्छति विद्यालयीयवस्त्राणि (ड्रेस) प्रयच्छति च। न्यासद्वारा प्रतिवर्षं एम.ए. संस्कृतपरीक्षायां सर्वाधिकाङ्कप्राप्तकर्त्रे छात्राय पञ्चसहस्त्ररूप्यकाणि प्रदीयन्ते। इत्थमेवाचार्यपरीक्षायां सर्वोच्चाङ्कप्राप्तकर्तृभ्यः पञ्चसहस्ररूप्यकाणि प्रदीयन्ते। लेखकेभ्यः पुस्तक- प्रकाशनाय न्यासो धनं यच्छति। प्रत्यब्दं न्यासः अशीतिसहस्त्ररूप्यकाणि विभिन्न-संस्कृतप्रवृत्तिभ्यो व्ययीकरोति। दीपावलिपर्वणि भारत्याः नववर्षप्रवेशावसरे भवत्यै भारतीपरिवारो दीर्घायुष्यं श्रेष्ठं स्वास्थ्यं च कामयते।

भारत्याः प्रबन्धसम्पादकपदधुरं वहन्ति पं. श्री सुदामाशर्माणः। भवन्तः राष्ट्रीयस्वयंसेवकसंघस्य प्रचारकार्येण सह भारत्याः सम्यक् प्रकाशनाय सर्वात्मना यतन्ते। समये कर्गदव्यवस्था भवतैव सम्पाद्यते। मुद्रकाय मुद्रणादेशं प्रयच्छन्ति। विज्ञापनानि प्राप्नुवन्ति। विज्ञापनैर्धनं लभन्ते। स्वप्रभावेण दानदातृभ्योऽपि धनं प्राप्नुवन्ति। प्रेरकेभ्यः स्मारयन्ति च। समये लेखान् प्राप्तुं कर्मचारिणो विदुषां गृहे प्रेषयन्ति। स्वयमपि पत्रिकायै लिखन्ति। भवतां सुदृढपरिश्रमेणैव प्रतिमासं भारती समये प्रकाशमायाति।

दीपावलिपर्वणि नववर्षप्रवेशावसरे भारती-परिवारो भवते दीर्घायुष्यं मङ्गलञ्च कामयते।

अस्माकमायुर्वेदस्तम्भलेखकाः वर्तन्ते आयुर्वेदविश्व- विद्यालयस्य कुलपतिचराः डा. बनवारीलालगौड- महोदयाः। एते आयुर्वेदशास्त्रस्याधिकृता विद्वांसो वर्तन्ते। भवन्तो नवीनवैज्ञानिकैः साधनैः विदेशेष्वपि आयुर्वेदं प्रचारयन्ति। आयुर्वेदस्य महत्वं विज्ञापयन्ति। भवन्तः कुशलाश्चिकित्सकाः। सर्वमौषधिं स्वगृहे स्वकीयसंरक्षणे पूर्णविधानेन निर्मान्ति। अत एव भवतां चिकित्सया सहस्रशो जनाः स्वास्थ्यलाभं प्राप्नुवन्ति। भारत्यां भवन्तः प्रतिमासं सामयिकीमायुर्वेदीयजीवनचर्यां शास्त्रप्रमाणैः वर्णयन्ति। भवतां संस्कृतेऽप्यसाधारणोऽधिकार विद्यते। प्रौढसंस्कृत- भाषायां भवन्तः ऋतुचर्यां वर्णयन्ति। ततश्च सामान्याः जना अपि भारतीपठनेन स्वकीयां दिनचर्यां समयानुसारिणीं कुर्युः इति धिया हिन्द्यामपि तत्सर्वं वर्णयन्ति। नववर्ष- प्रवेशावसरे दीपावलिपर्वणि भारतीपरिवारो भवद्भ्यो दीर्घायुष्यं श्रेष्ठं स्वाथ्यश्च कामयते।

भारत्याः अक्षरशोधकाः सहसम्पादका भूतपूर्व- संस्कृतशिक्षा निदेशका प्रो. सुरेन्द्रकुमारशर्माणः सुप्रसिद्धाः विद्वांसो वर्तन्ते। भवन्तः साहित्यशास्त्रस्य मर्मज्ञाः विद्वांसः विद्यन्ते। भवद्भिः नैकानि काव्यानि विरचितानि। सरसकवितासर्जने भवन्त आचार्याः वर्तन्ते। मूललेखेष्वपि समागता अशुद्धयो भवन्ताः सुधार्यन्ते। भवतां सहसम्पादकत्वे समये भारती प्रकाशमायाति। दीपावलिपर्वणि भारत्या नववर्षप्रवेशावसरे भारती- परिवारो भवद्भ्यो दीर्घायुष्यं श्रेष्ठं स्वास्थ्यं च कामयते।

अन्येभ्यः सहसम्पादकेभ्यः शिवशरणत्रिपाठी- महोदयेभ्यः डॉ. शिवचरणशर्मणे च दीपावलिपर्वणि नववर्षप्रवेशावसरे भारतीपरिवारो दीर्घायुष्यं मङ्गलञ्च कामयते।

भारतस्य प्रमुखो महोत्सवः

# पञ्चदिवसीयो दीपमालिकोत्सवः

❑ म.म. देवर्षिकलानाथशास्त्री, प्रधानसम्पादकः

कार्तिकामावस्यायामायोज्यमानो दीपात्सवो वर्षस्य प्रमुख उत्सवः परिगण्यते भारते। भारतवर्षस्य सांस्कृतिकेतिहासे कार्तिकामावस्यायां दीपावली-महोत्सवस्य यद् वर्तमानस्वरूपमस्ति न तत् प्राचीनम्। भारतस्य पुरातनेषु काव्यादिग्रन्थेषु भारतीया अन्यान्ये उत्सवा बहोः कालाद् वर्णिता उपलभ्यन्ते किन्तु तत्र दीपावल्या अद्यतनस्य स्वरूपस्य नोल्लेखः। कालि-दासहर्षादिभिः कविभिर्होलिकोत्सवस्य मदनोत्सवरूपेण काव्यमयं वर्णनं विशिष्टं कृतमस्ति किन्तु दीपावल्या-स्तादृक् वर्णनं न कुत्राप्युपलभ्यते। तदिदं सूचयति यदस्योत्सवस्य न तदात्वे तावद् भारतव्यापि महत्त्वमभूद् यदद्य विद्यते। यद्यपि भोजराजस्य कविकण्ठाभरणादि-ग्रन्थेषु प्राकृतगाथासु च दीपोत्सवस्य कस्यचन वर्णनं लोकोत्सवविधया समुपलभ्यते किन्तु कस्यां तिथौ तत् संमान्यते स्मेति न विदितम्। प्रामाणिकेषु पुरातनग्रन्थेषु तु दीपोत्सवस्य वर्णनं शरत्पूर्णायां कृतं समुपलभ्यते। कतिपयपुराणेषु दीपावल्याः स एव विधिर्वर्णित उपलभ्यते यदद्य दृश्यते किन्तु बहुषु प्राचीनेषु पुराणेषु न तस्योल्लेखः। दीपावल्याः पुराणेषु चर्चा केवलं लक्ष्मीपूजाप्रसङ्गे एव समुपलब्धुं शक्या, किन्तु कार्तिकामायां प्राचीनपुराणेषु न कापि लक्ष्मीपूजा विहिताऽस्ति। लक्ष्म्या उत्पत्तिः पूजाविधिश्च प्रायः सर्वेषु पुराणेषु लभ्यते किन्तु तदिदं विशेषत उल्लेखनीयं यत्तेषु लक्ष्मीपूजायास्तिथयः शुक्लपक्ष एवोल्लिखिताः। कार्तिकमासेऽपि लक्ष्मीपूजनमधिकांशतः पुराणेषु न लभ्यते। स्कन्दपुराणे-

**पौषे चैत्रे तथा भाद्रे पूजयेयुः स्त्रियः श्रियम्।**
**सिंहे धनुषि मीने च स्थिते सप्ततुरङ्गमे।।**

इत्युक्त्वा कार्तिके लक्ष्मीपूजायाः संभावनैव पिहिताऽस्ति। स्पष्टतश्च तदिदं विहितं-

**''प्रत्यब्दं पूजयेल्लक्ष्मीं शुक्लपक्षे गुरोर्दिने।**
**गुरुवारे तु पूर्णा च यत्नेन यदि लभ्यते।**
**तत्र पूज्या तु कमला धनपुत्रविवर्धिनी।।''**

इति पूर्णिमा लक्ष्मीपूजनायोपयुक्ता तिथिर्वर्णिता, नाऽमा। लक्ष्मीपूजाया अमायां निषेधः-

**नापराह्णे न रात्रौ च नासिते न त्र्यहस्पृशि।**
**त्रयोदश्यां तथाष्टम्यां कमलां नैव पूजयेत्।।**

इति। लक्ष्मीचरित्रेऽपि

**''न कृष्णपक्षे रिक्तायां दशमीद्वादशीषु च।**
**श्रवणादिचतुर्ऋक्षे कमलां नैव पूजयेत्।।''**

इति लभ्यते। युक्तमपीदम्। पुराणेषु चन्द्रः खलु 'लक्ष्मीभ्रातेत्युद्दिष्टः'। अतो हि चन्द्र-सत्त्व एव लक्ष्मीपूजा विहिता, न तस्याभावे।

**तान्त्रिकं महत्त्वम्**

अवश्यमेव तन्त्रशास्त्रस्य महाविद्यास्वरूपिणी या रात्रिरुपदिष्टा तस्या उपासनायै समुचितः कालः अमाया भवेदिति संभवम्। '**कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणेति**' मार्कण्डेयपुराणे व्यपदिष्टा कालरात्रिः कार्तिकामावास्येति तान्त्रिका अभिप्रयन्ते। '**कालरात्रि-र्महेशानि ताराकालीप्रियङ्करी**' ति शाक्तप्रमोदे। एवं चास्यां रात्रौ तान्त्रिकोपासना प्राचीनात्कालाद् विहिता

स्यात् परं दीपोद्योतनादिना लक्ष्मीपूजा बहुषु प्राचीनग्रन्थेषु नोपलभ्यते। '**दीपोत्सवचतुर्दश्याममया योग एव चेत्। कालरात्रिः**' इति शक्तिसंगमतन्त्रीयं वाक्यं तु चतुर्दश्यां दीपोत्सवस्य सूचकत्वाल्लक्ष्मीपूजाया अमायां विधायकं न साधयितुं शक्यते। शक्तिसंगमतन्त्रस्य समयोऽपि न भूयान् पुरातन इति शोधविदुषां मतम्। श्रीमद्भागवते गोवर्धनपूजाया विस्तृत उल्लेखोऽस्ति किन्तु दीपोत्सवसदृशस्य वर्तमानस्य महोत्सवस्य तत्र संकेतोऽपि नोपलभ्यते। विशाखदत्तविरचिते मुद्राराक्षस-नाटके कौमुदीमहोत्सवसमारम्भस्य सुविस्तृत उल्लेखो वर्णनं चास्ति किन्तु तत्र दीपावल्याः कार्तिकामायां जायमानस्य वा कस्यचनोत्सवस्य संकेतोऽपि नास्ति। शोधविदुषां तदिदं मतमस्ति यदीशवीयैकादशशताब्दीतः पूर्वं विरचिते प्रामाणिके कस्मिन्नपि ग्रन्थे दीपावल्यास्तादृक् वर्णनं नास्ति। अनेन तदिदमनुमीयते यदस्योत्सवस्य वर्तमानं महत्त्वं स्वरूपं च ईशवीयैका-दशशतात्परमेव स्थापितम्।

यद्यपि पद्मपुराण-वामन-मत्स्य नीलमतादिपुराणेषु दीपावल्या उल्लेखो लक्ष्मीपूजाया विविधानि विधानानि च दृश्यन्ते किन्तु पुराणानां स्वरूपस्य निर्माणकालस्य च प्रामाणिकं निर्धारणं नाद्यापि संजातं, तेषु कुत्र कुत्र कानि क्षेपकानि परस्तात् संयोजितानीति च न विश्लिष्टमिति तेषां समुल्लेखेन समयसीमानिर्धारणं न सुशकमिति विदुषां सिद्धान्तः। अत एव हि ग्रन्थान्तराधारेणैव समयनिर्धारणं क्रियते। ततश्च दशम्याः शत्या उत्तरार्धे लिखितायां यशस्तिलकचम्प्वां शरत्पूर्णाया दिने दीपोत्सवस्योल्लेखः, एकादश्यां शत्यां भारते समायातेन वैदेशिकयात्रिणा अलबेरूनीत्याख्येन कार्तिकशुक्लप्रतिपदि दीपोत्सवो वर्णितः, अन्यत्रापि नागानन्दादिषु '**दीपप्रतिपदुत्सवे**' इत्युल्लेखो दृश्यते इति सर्वमिदं साधयति यत् कार्तिककृष्णामायामद्यत्वे य उत्सवः संमान्यते स पूर्वं प्रतिपदि, शरत्पूर्णादिदिवसेषु च संमान्यते स्म। विजयनगर-साम्राज्ये पञ्चदश्यां शताब्द्यां लिखितस्यैकस्य विशालस्य सन्दर्भग्रन्थस्य '**आकाशभैरव**' कल्पस्यापि वर्णनमस्मिन्नेव दिने दीपोत्सवं सूचयति। एतस्मात् परं सर्वेष्वपि ग्रन्थेषु कार्तिकामायामेव दीपावल्युत्सवः समुपलभ्यते। सप्तदश्यां शताब्द्यां लिखितेषु निर्णय-सिन्धु-धर्मसिन्धु-प्रभृतिनिबन्धेषु लक्ष्मीपूजन-दीपोत्सवादि सर्वाण्येव विधानानि तथैव समुपलभ्यन्ते यथा तान्यद्यानुष्ठीयन्ते। भविष्यपुराणेऽपि तदेव विधानं तथैव समुपन्यस्तमुपलभ्यते- किन्तु पुराणस्यास्य स्वरूपं समयनिर्धारणाय न प्रामाणिकं यतो ह्यस्मिन् पुराणे क्षेपकश्लोकाः अर्वाचीने समयेऽपि संयोजिता अभूवन्निति मन्यते।

**सुखसुप्तिका** - पौराणिकमान्यतानुसारं 'सुखसुप्तिका' सुखरात्रिर्वा सेयमभिधीयते यतो ह्यस्यामेव रात्रौ सर्वे देवा दैत्यानामत्याचारेभ्यो मुक्ता भूत्वा विष्णोर्वरमाप्य सुखेन सुषुपुः। अस्मिन् दिने सायं लक्ष्मीपूजा विहितास्ति, तस्याः स्वागतार्थं च गृहाणां स्वच्छता, सुधालेपः, गृहेषु सार्वजनिकस्थानेषु च दीपानां प्रकाशः, दीपपंक्तिदानं चेत्यादीनां महत्त्वं वर्णितमस्ति। प्राचीनादेव कालात् श्राद्धपक्षमारभ्य कार्तिकामां यावत् पितृणां समागतानां पुनः स्वलोकेषु परावर्तनसमये मार्गदर्शनार्थं 'माकाशदीप' नाम्ना उच्चस्थानेषु दीपानां स्थापनस्य परम्पराऽभूत्। एवं च नवधान्येष्टिरूपस्य शरत्कालीनस्य वैदिकोत्सवस्य, आकाशदीपप्रथायाः,

कौमुदीमहोत्सवस्य आश्विनमासे क्रियमाणाया लक्ष्मी-पूजायाश्च विविधाः परम्पराः एकीकृत्य एकादश्यां शताब्द्यां दीपोत्सवस्य वर्तमानं स्वरूपं कदाचिदुद्गतं स्यादिति मदीयानुमानम्।

**व्यापारिणामुत्सवः**

उपर्युल्लिखितानां प्रमाणानामाधारेण तदिदं वक्तुं शक्यते यत्कार्तिकामायां लक्ष्मीपूजनदीपोद्योतनादीनां वर्तमानं स्वरूपमस्योत्सवस्य ईशवीयपंचदशशताब्द्यां समुद्गतं स्यात्। तदात्वे हि भारते वाणिज्यस्य सांस्थानिकं महत्त्वं सुस्थापितमासीत्। ततः पूर्वं तु **'कृषिगोरक्ष-वाणिज्यमित्यादि-दिशा'** स्थानीयं वाणिज्यमेव व्यापारिणां जीविकासाधनमासीत्। वैदेशिकव्यापारस्य ईस्ट इण्डिया कंपनीत्यादीनां स्थापनानन्तरमेवात्र विकासः समजनि, मुद्राया महत्त्वमेधितम्। तदनन्तरं भारतस्य पश्चिमप्रदेशेषूत्सवस्यास्य महत्त्वमप्यवर्धत। अस्मिन्नुत्सवे यल्लक्ष्म्याः स्वरूपमस्ति तदपि वैदिकदेव्याः स्वरूपं नास्ति, अपि तु धनदेव्याः स्वरूपमस्ति। अत एवास्मिन् दिने कुबेरस्यापि पूजा क्रियते। **'सुखरात्र्यां प्रदोषे तु कुबेरं पूजयन्ति ये'** इति रुद्रधरः। भविष्यपुराणेपि **'वस्त्रैः पुष्पैः शोभितव्याः क्रय-विक्रयभूमयः'** इत्युक्त्वा क्रयविक्रयभूमिष्वस्योत्स-वस्य विशिष्य महत्त्वं साधितम्। अद्य हि धनपतयो मध्यरात्रौ स्वमंजूषास्थ-रजतमुद्राणां-पत्र (करेंसी-नोट) मुद्राणां चापि यां पूजां विदधति सापि सूचयति यल्लक्ष्मीपूजा अद्यतनी धनस्यैव पूजास्ति।

भारतीयपरम्परानुसारमस्य देशस्योत्सवसमुदायो होलिकोत्सवाद् वसन्तर्तौ समारभ्यते-दीपोत्सवे शरदृतौ च समाप्तिमेति। अस्य प्रदेशस्य शीतप्रधानत्वादुत्सवाः शीतर्तौ नाभवन्। शरदि यः शरत्संपातो भवति यश्च आङ्गलभाषायाम् **'आटम्नल एक्विनाक्स'** इत्युच्यते तस्मिन् सूर्यो विषुवरेखोपरि समागच्छति-ऋतुश्च सुरम्यो भवति। तदनन्तरं सूर्यो दक्षिणं प्रति संक्रमते येन हि विषुवरेखातः उत्तराः प्रदेशाः शीतेनाक्राम्यन्ते। एवमेव होलिकोत्सव-समीपे-वसन्तसंपातस्य समयः समागच्छति यो हि पाश्चात्यैः **'वर्नल एक्विनोक्स'** इत्युच्यते। तदापि सूर्यो विषुवरेखोपरि भवति, तदनन्तरं चोत्तरं प्रति संक्रमते येनोत्तरप्रदेशेषु शीतं समाप्यते- एवं चोत्सवाः प्रारभ्यन्ते। अतः खलु प्राचीने समये शरत्पूर्णायामेव सुबहु शीतं तेषु प्रदेशेष्वभवद् यत्रार्या न्यवात्सुः। यदा ते उष्णतरेषु प्रदेशेषु समायातास्तदा दीपावलीदिनेऽपि सुसहत्वाच्छीतस्य, तदानीमप्युत्सवाः प्रारब्धाः। एवं खलु दीपमालिका कौमुदीमहोत्सव-स्योत्तराधिकारिणी भूत्वाऽवातरत्।

भारतस्योत्तरेषु पश्चिमेषु च प्रान्तेषु दीपावल्या विशेषतो महत्त्वमस्ति। दक्षिणभारते पोंगलस्याधिकं महत्त्वं, न दीपावल्याः। वंगेष्वपि दुर्गापूजाया अधिकं महत्त्वम्। विजयदशम्यामेव दुर्गाविसर्जनानन्तरं तत्रोत्सवाः समाप्यन्त इव। अवश्यमेव मध्यकालीनेषु विजयनगरसाम्राज्यीयेषु ग्रन्थेषु दीपावल्युत्सववर्णना-न्युपलभ्यन्ते तैश्चेदमनुमीयते यत्पुराऽस्योत्सवस्य दक्षिणवर्तिनी सीमा उत्तरकर्णाटकान् यावदभूत्।

**लक्ष्मीजयन्ती**

तदिदमपि विदुषां विचारणीयं यद् दीपमालिका किं 'लक्ष्मीजयन्ती' अर्थात् लक्ष्म्या उत्पत्तिदिनमस्ति ? यद्यपि सेयं कल्पना सुतरामर्वाचीना, प्राचीनानां हि देवानामुत्पत्तिदिनानामनुल्लेखात्। न हि वैदिकानां

वरुणेन्द्रादिदेवानां जयन्ती: कश्चन सम्मानितवान्। किन्तु परस्तात् पौराणिकावताराणां 'जयन्ती' संमाननं प्राचलत्। ततश्च लक्ष्मीजयन्तीति कैश्चन सोयमुत्सवोऽपदिष्टः। कोऽत्राधारो भवेदिति न सुविदितं किन्तु विदुषां विनोदायात्रैकमाधारं प्रस्तौमि।

लक्ष्मी:, चन्द्रमा:, ऐरावत:, उच्चै:श्रवा इत्यादीनि चतुर्दशरत्नानि समुद्रमंथनतः समुत्पन्नानीति पुराणानां मान्यता। समुद्रमन्थन्स्य च का तिथिरभूदिति न सूचितमस्ति तत्र। किन्तु सेयं कल्पना कथमुद्भूता स्यादित्यत्रैकमनुमानमस्ति। समुद्रेषु वेलोत्प्लवः (**ज्वार**, Tides) तदा तीव्रतरो भवति यदा चन्द्रः पृथ्वीतो निकटतमो भवति, इदं हि पाश्चात्यैः '**द पेरिजी आव द मून**' इत्युच्यते। इयं हि निकटतमता रसन्तसम्पात-शरत्संपातयोरेव समये समागच्छति। एवं हि सूर्यस्य विषुवरेखोपरि संक्रमणे अर्थात् शरद्वसन्तयोः (मार्च-मासे सितम्बरमासे च) समुद्रेषु उच्चवेलोत्प्लवा भवन्ति। उत्प्लवा अपि द्विविधा उच्चोत्प्लवाः अवप्लवाश्च **( स्प्रिंग टाइड अथवा उच्चज्वारस्तथा नीपटाइड अथवा निम्नज्वार: )।** एतेषाम् उच्चोत्प्लवास्तीव्रतरा भवन्ति ये शरत्पूर्णिमायां, तीव्रावप्लवा अमायां सम्भवन्ति। तदा हि सूर्यचन्द्रमसोरेकदिशास्थत्वाद् द्वयोरपि सम्मिलिताऽऽ-कर्षणशक्तिः समुद्रजलमुत्थापयति। आश्विनकृष्णामायां शुक्लपूर्णिमायां कार्तिकामायां च समागच्छन्त उत्प्लवा अवप्लवाश्च तीव्रा भवन्ति। तदा हि समुद्रीयो जलक्षोभः समुद्रमन्थनस्यैव दृश्यमुपस्थापयति। ततो ह्यपरस्मिन् दिने समुदयमानस्य द्वितीयाचन्द्रस्य समुद्रमन्थनोत्थत्वमपि सहसैवानुमातुं शक्यते। इदं सुसंभवं यल्लक्ष्म्याः समुद्रमन्थनोद्भवत्वेन कार्तिकामायाश्च समुद्रक्षोभस्य तीव्रतरत्वेन तस्मिन्नेव दिने तस्याः समुत्पत्तिरनुमिता स्यात्। समुद्रपारीयव्यापारस्य स्थापनानन्तरमेव भारते लक्ष्म्या नृत्यं तीव्रतरं संजातमित्यपि सुविदितमेव।

**उत्सवसमुदायः**

जैनसंस्कृतौ दीपावल्युत्सवस्य परम्परा प्राचीनतरा। महावीरनिर्वाणदिवसत्वात् कार्तिकामाया अपरस्मिन्नेव दिने जैनानां नूत्नसंवत्सर आरभ्यते। 'कल्पसूत्रे' समुल्लेखोऽयं समुपलभ्यते यद् '**वीरनिर्वाणकारणाद् यदन्तर्ज्योतिर्विलीनं तस्य क्षतिपूरणार्थं वयं परः-सहस्रम् अन्तर्ज्योतिषां दीपान् ज्वालयिष्यामः**' इत्यादि। भारते बहूनां प्रान्तानां व्यापारसंस्थानानां वित्तीयवर्षो दीपावल्या अनन्तरमेव समारभ्यते स्म, तदैव मसीपात्रादि-पूजनं बही-खातादीनां नवीकरणं च क्रियते स्म। तदिदं जैनपरम्परा-प्रभावादेव समभूद् यतो जैना व्यापारे प्रमुखा अभूवन्। महर्षेर्दयानन्दस्य निर्वाणदिवसोऽप्ययमेवेति गतशताब्दीतोऽस्य महत्त्वमार्यसामाजिकानामन्येषां च कृते सुतरां समेधितम्। स्वामिनो रामतीर्थस्याप्ययं निर्वाणोत्सवः। यस्त्वयं प्रवादः सर्वत्र प्रसृतो यद्रामस्य रावणोपरि विजयस्यानन्तरमयोध्यायां समागमनोपलक्ष्येऽयोध्यावासिभिर्दीपाः प्रज्वालिता अभूवन्नतः सोऽयमुत्सवः सम्मान्यत इति, तन्निर्भूतम् तस्य तु मूलं मृग्यमेव। मया तु कुत्राप्येतस्य समुल्लेखः पुराणेषु वा धर्मशास्त्रेषु वाऽन्यत्र वा न प्राप्तः।

दीपमालिका-निमित्तका उत्सवाः कार्तिककृष्णद्वादशीत एवारभ्यन्ते। तस्यां तिथौ गोवत्सादीनां पूजा भवति या कृषिप्रधानाया अस्मत्संस्कृतेः प्रतीकम्। गोवत्सद्वादशीति नामास्याः। यमत्रयोदशी अपरस्मिन् दिने

भवति यदाऽर्धरात्रौ यमाय दीपदानं क्रियतेऽकालमृत्यु-निवारणार्थं प्रार्थना च शीतप्रधानेषु स्थलेषु शीतकालस्य मारकत्वनिवारणार्थमेतदनुष्ठानं भवेदित्यनुमीयते। अपरस्मिन् दिने नरकचतुर्दशी भगवता नरकासुरसंहारो-पलक्ष्ये संमान्यते किन्तु तस्याः सामाजिकमहत्त्व-मस्ति-वर्षासु समागतानां शारीरिकआवासीयादिविविध-मलानामपनोदनं-गृहादीनां सम्मार्जनं, साभ्यङ्गं स्नानं च कृत्वा स्वच्छतायाः स्वास्थ्यस्य च पुनः स्थापनरूपेण। अत एव अपामार्गादीनां त्वक्स्वास्थ्यकराणां स्वच्छीकारकपदार्थानां चापि प्रयोगोऽत्र विहितः। अत्रैव दिने यमतर्पणमपि विधीयते। अमायां दर्शश्राद्ध-देवपूजादीनां विधानं त्वस्त्येव, सायंकाले लक्ष्मीपूजा-दीपदान-दिवा-व्रत-रात्रिभोजनादीनामपि विधानमस्ति। मध्यकालीनैका प्रथाप्यस्मिन् दिने समाद्रियते। रात्रौ पात्रादिवादनद्वारा अलक्ष्मीर्गृहिणीभिर्गृहेभ्यो बहिर्निः-सार्यते बहुषु प्रान्तेषु।

दीपावल्या अपरस्मिन् दिनेऽनेके उत्सवाः संमान्यन्ते। श्रीमद्भागवते कृष्णेन इन्द्रपूजायाः खण्डनं कृत्वा गोवर्धनपूजाया महत्त्वं साधितमस्ति यद्धि सामन्तोचितपरम्पराया विरोधे कृषकाणां जनतान्त्रिक-परम्पराया महत्त्वस्थापनस्य प्रतीकमस्ति। अतोऽस्मिन् दिने तस्यैव स्मृतिं सम्मानयितुं गोवर्धनपूजा विधीयते, विशेषतो वैष्णवमन्दिरेषु। अस्मिन्नेव दिने बलिराज-पूजाऽपि क्रियते। त्रैलोक्यविजयी बलिर्वामनस्वरूपाय विष्णवे त्रैलोक्यस्य दानं कृत्वा चिराय स्मरणीयः संजातः। एतद्विषये बह्व्यः कथाः सुप्रचलिता इति नाधिकं पल्लवनस्यावश्यकता, अस्मिन् दिने '**मार्गपाली**' ति नाम्ना रज्जुनिर्मिता '**वन्दनमालिका**' सार्वजनिकस्थले, राजद्वारे वोच्चैः संस्थाप्यते- तदधस्तात्सामन्ता, राजवर्गीयाश्च, सामान्यजनाश्चैकत्रीभूय विपरीतमुखाभ्यां तस्या आकर्षणं कुर्वन्ति। रज्ज्वाकर्षण- (Tug of war) स्येव सेयं क्रीडा वष्टिकाकर्षणस्य मध्यकालिकी परम्परा प्रतिभाति। अत्र सामान्यजनानां विजयो भवति चेत्तच्छुभं शकुनं गण्यते। '**तत्र हीनजातिजये राजजयः**' इति धर्मनिबन्धाः। अस्मिन् दिने उच्चाधिकारिणां गृहेषु गमनस्य, शुभाकाङ्क्षाणामादानप्रदानादीनां या परम्परा-ऽऽस्ति साऽस्या एव सामन्तकालीनपरम्परायाः प्रभावो भवेदिति सुशकमनुमातुम्। एतस्याः परम्पराया अपरमेकं स्वरूपं महाराष्ट्रेषु '**गोविन्दा आला रे**' इति गीतिमवलम्ब्य प्रचलितं यत्र हि सार्वजनिके कस्मिंश्चित् स्थाने किंचन स्थाल्यादिकं वस्तु (श्रीकृष्णस्य नवनीतस्थाली-चोरणप्रतीकत्वेन) अत्युच्चैर्लम्ब्यते, 'गोविन्दा आला रे' इति गीतिं गायन्तो युवकाः निःश्रेण्यादियान्त्रिकसाहाय्यं विनैव परस्परोपर्यारुह्य तस्याः स्थाल्या अवतारणं कुर्वन्ति, शौर्यस्य चेदं प्रतीकं परिगण्यते। अपरस्मिन् दिवसे यमद्वितीया सम्मान्यते। इदं हि प्रसेधितमस्ति- यदस्यां तिथौ स्वयं यमराजः स्वभगिन्या यमुनाया गृहे भोक्तुमागच्छति। अत एव 'भ्रातृद्वितीया' इति नाम्ना सेयमुत्तरे भारते सम्मान्यते, अस्मिन् दिने भ्रातरः स्वभगिनीनां गृहेषु भोक्तुं गच्छन्ति, ताश्च दक्षिणादिभिः सत्क्रियन्ते तैः।

एवं हि प्रायः साप्ताहिकः सोऽयमुत्सवसमुदायो दीपावल्या महत्त्वं साधयति। अद्यत्वे तूत्सवोऽयं भारतस्य प्रमुखो महोत्सवः संजातोऽस्ति। वर्षस्य प्रमुखस्योत्सव-द्वयस्य (होलिका दीपमालिका चेति) एकतरत्वेनास्य महत्त्वं समग्रेऽपि देशे प्रसृतमस्ति।

# वस्त्वलङ्कारव्यङ्ग्यचर्वणायां चित्तदशा

❑ डॉ. कमलकान्तबालाणः

काव्यं नाम भावानां प्रकटीकरणं, चित्तद्रवीभूतानां बहिर्निष्क्रमणमिति। हिन्दीसाहित्यस्य प्रसिद्धैः कथाकारैः उपन्यासकारैः मुंशीप्रेमचन्दैरपि कथ्यते –

''साहित्य समाज का दर्पण होता है। समाज में कुछ घटित होता है उसका बहिर्निष्क्रमण साहित्य या काव्य है।''

ध्वन्यालोके आनन्दवर्धनाचार्येण काव्यं किमिति उच्यते –

**''सहृदयहृदयाह्लादि शब्दार्थमयत्वमेव काव्यलक्षणम्''१**

काव्यप्रकाशकारेण मम्मटाचार्येण काव्यस्वरूपं प्रतिपाद्यते –

**''तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि''२**

अदोषौ सगुणौ अनलङ्कृती पुनः क्वापि अर्थात् स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः शब्दार्थौ काव्यमिति।

काव्यस्याऽस्य भेदाः काव्यशास्त्रकारैर्द्विविधरूपेण क्रियन्ते–

**उत्तमममध्यमाधमभेदेन वा ध्वनिगुणीभूतचित्रकाव्यमिति।**

काव्यस्याऽस्यात्मा कः स्यात् इति जिज्ञासायां सर्वैरालङ्कारिकैर्विविधानि मतानि प्रतिपादितानि। सर्वप्रथमं रससम्प्रदायोऽवगम्यते। मतस्याऽस्य प्रतिपादकाः भरतमुनि – नन्दिकेश्वरा इत्यादयः सन्ति। रसस्वरूपं प्रतिपादयन्नाह भरतमुनिः–

''रस इति कः पदार्थः? उच्यते आस्वाद्यमानत्वात्। कथमास्वाद्यते रसः यथाहि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसमास्वादयन्ति सुमनसः हर्षादींश्चाधिगच्छन्ति तथा नानाभावाभिनयव्यञ्जितान् वानङ्गसत्त्वोपेतान् स्थायिभावान् आस्वादयन्ति सुमनसः प्रेक्षकाः हर्षादींश्चाधिगच्छन्ति।

रसनिष्पत्तिप्रक्रियां वर्णयता तेनोक्तं –

**''विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः''३**

तदनन्तरं भामह– भट्टोद्भट्टः इत्यादयः सन्ति। एतैरलङ्कारः काव्यस्यात्मतत्त्वरूपेण स्वीक्रियते –

**सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।**
**यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना।।४**

वामनाचार्येण रीतिः काव्यस्यात्मत्वेन स्वीक्रियते –

**रीतिरात्मा काव्यस्य५**

कुन्तकाचार्येण वक्रोक्तिस्वरूपकाव्यम् आत्मतत्त्व–रूपेण स्वीक्रियते –

**वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते।**

क्षेमेन्द्राचार्येण औचित्यं काव्यस्यात्मतत्त्वरूपेण मन्यते –

**अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्।**
**प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा।।**

आनन्दवर्धनाचार्येण ध्वनिः काव्यस्यात्मतत्त्वरूपेण मन्यते –

**काव्यस्यात्मा ध्वनिः६**

आनन्दवर्धनाचार्येण ध्वनिरूपव्यङ्ग्यस्य भेदत्रयं क्रियते –

१. वस्तुरूपम्

1 ध्वन्यालोकः, सम्पादकः – विश्वेश्वरः, ज्ञानमण्डललिमिटेडम्, वाराणसी, २००६
2 काव्यप्रकाशः, सम्पादकः – विश्वेश्वरः, ज्ञानमण्डललिमिटेडम्, वाराणसी, २००७
3 नाट्यशास्त्रम् – भरतमुनिः
4 काव्यालङ्कारः – भामहः २/९५
5 काव्यालङ्कारसूत्राणि – वामनः ( १-०२-०६ )
6 ध्वन्यालोकः – विश्वेश्वरः ज्ञानमण्डलट्रस्ट लिमिटेडम्, वाराणसी, प्रथमाकारिका

२. अलङ्काररूपम्

३. रसरूपञ्च।

शोधलेखेऽस्मिन् मया वस्तुरूपव्यङ्ग्यम्, अलङ्काररूपव्यङ्ग्यञ्च स्वीक्रियेते।

**वस्तुरूपव्यङ्ग्यम् –**

यद् अलङ्काररसरूपव्यङ्ग्यात् भिन्नं सत् व्यङ्ग्य-वस्तुरूपव्यङ्ग्यम् इति मन्यते। तस्य व्यङ्ग्यस्य प्रधानत्वे ध्वनिः, गुणीभूतत्वे गुणीभूतव्यङ्ग्यत्वम्, व्यङ्ग्याभावे चित्रत्वं स्वीक्रियते। वस्तुरूपव्यङ्ग्यचर्वणायां वाक्यरूपे चित्तदशा सैव तिष्ठति यादृशी वस्तुरूपकाव्ये व्यञ्जिता किन्तु व्यङ्ग्यचर्वणायां भिन्ना चित्तदशा अस्माभिः अनुभूयते –

**१. वाच्यविधिरूपं व्यङ्ग्यनिषेधरूपम् –**

**भ्रम धार्मिक विस्रब्धः स शुनकोऽद्य मारितस्तेन।**
**गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन।।७**

अत्र वाच्यरूपे तु रे पण्डितजी काननेऽस्मिन् मुक्तस्वभावेन भ्रमणं करोतु इति विधिरूपा चित्तदशा सामाजिकैरनुभूयते किन्तु व्यङ्ग्यदशायां निषेध-रूपव्यङ्ग्यं सामाजिकैरनुभूयते। अर्थात् निषेधरूपा चित्तदशा तस्मिन् समये व्यज्यते। येन शुनको मारितः तेन सिंहेन पण्डितोऽवश्यमेव मारयितुं शक्यते।

**२. वाच्ये प्रतिषेधरूपे व्यङ्ग्यविधिरूपः –**

**श्वश्रूरत्र निम्मजति अत्राहं दिवसके प्रलोकय।**
**मा पथिक रात्र्यन्धके शय्यायां मम निमंक्ष्यसि।।८**

अत्र वाच्यार्थो निषेधरूपो वर्तते किन्तु व्यङ्ग्यार्थो विधिरूपो वर्तते। अत्र व्यङ्ग्यदशायां विधिरूपचित्तदशा व्यज्यते।

**३. वाच्यविधिरूपो व्यङ्ग्यानुभयरूपः –**

**व्रज ममैवैकस्या भवतु निःश्वासरोदितव्यानि।**
**मा तवापि तया विना दाक्षिण्यहतस्य जनिषत।।९**

अत्र वाच्यार्थः तु गमनरूपविधिर्वर्तते किन्तु व्यङ्ग्यचर्वणायाम् अनुभयात्मकरूपा चित्तदशा व्यज्यते।

**४. क्वचिद् वाच्ये प्रतिषेधरूपे व्यङ्ग्ये अनुभयरूपे –**

**प्रार्थये तावत् प्रसीद निवर्तस्व**
**मुखशशिज्योत्स्नाविलुप्ततमोनिवहे।**
**अभिसारिकाणां विघ्नं करोष्यन्यासामपि हताशे।।**

अत्र वाच्यार्थः प्रतिषेधरूपो वर्तते किन्तु व्यङ्ग्यचर्वणायां सामाजिकानां चित्तदशा अनुभयरूपा भवति विधिप्रतिषेधोभयरूपा चित्तदशा व्यज्यते।

**५. क्वचिद् वाच्याद् विभिन्नविषयत्वेन व्यङ्ग्यचर्व-णायां चित्तदशा व्यज्यते –**

**कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।**
**सभ्रमरपद्माघ्रायिणि वारितवामे सहस्वेदानीम्।।**

अत्र वाच्यार्थो नायिकायाः अविनीतरूपं प्रति सङ्केतयति किन्तु व्यङ्ग्यचर्वणायां भिन्ना चित्तदशा व्यज्यते। अस्या इदं व्रणं परपुरुषजन्यं नास्ति अपितु भ्रमरजन्यमिति। अनेन प्रकारेणात्र वाच्यार्थव्यङ्ग्यार्थ-विषयकचित्तदशा भिन्न-भिन्ना इति।

अस्य व्यङ्ग्यस्य प्रधानत्वे वाच्यार्थस्य व्यङ्ग्यार्थस्य भिन्ना-भिन्ना चित्तदशा अस्माभिरनुभूता।

गुणीभूतत्वे वाच्यार्थस्य व्यङ्ग्यार्थस्य भिन्ना-भिन्ना चित्तदशा भवति किन्तु तत्र व्यङ्ग्यार्थापेक्षया वाच्यार्थं प्रति सामाजिकानां सहृदयानां ध्यानं गच्छति। अत एव वाच्यार्थमुखी चित्तदशा दृश्यते –

**ग्रामतरुणं तरुण्या नवमञ्जुलमञ्जरीसनाथकरम्।**
**पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया।।१०**

---

7 ध्वन्यालोकः, स.विश्वेश्वरः, ज्ञानमण्डलट्रस्ट लिमिटेडम्, वाराणसी, पृष्ठसंख्या - २००६

8 तत्रैव पृष्ठसङ्ख्या - १५

9 तत्रैव पृष्ठसङ्ख्या - १५

10 काव्यप्रकाशः, सम्पादकः - विश्वेश्वरः - ज्ञानमण्डलट्रस्टलिमिटेड, वाराणसी, पं.सं. ३१

अत्र व्यङ्ग्यार्थः वञ्जुललतागृहे दत्तसङ्केता नागतेति तदपेक्षया मलिना मुखच्छायारूपवाच्यार्थं प्रति सहृदयानां चित्तदशा प्रवर्तते।

व्यङ्ग्याभावे चित्रत्वे सहृदयानां चित्तदशा केवलं शब्दानामुपरि वाच्यार्थस्य च उपरि राजते नान्यत्र इति।

**अलङ्कारव्यङ्ग्यचर्वणायां चित्तदशा**

अलङ्कारव्यङ्ग्यचर्वणायामपि प्रधानत्वेन वाच्यार्थस्यापेक्षया व्यङ्ग्यस्य भिन्ना चित्तदशा व्यज्यते किन्तु गुणीभूतत्वे तथा व्यङ्ग्याभावे केवलं वाच्यार्थस्य शब्दस्य च चमत्कारं प्रति चित्तदशा अस्माभिः प्राप्यते। प्रधानदशायाम् अलङ्कारव्यङ्ग्यं प्रति सहृदयानां भिन्ना चित्तदशा

**उपमालङ्कारव्यङ्ग्ये –**

**उल्लास्य कालकरवालमहाम्बुवाहं**
**देवेन येन जरठोर्जितगर्जितेन।**
**निर्वापितः सकल एव रणे रिपूणां**
**धाराजलैस्त्रिजगति ज्वलितः प्रतापः।।११**

अत्र प्राकरणिकं राजपक्षम्, अप्राकरिणकम् इन्द्रपक्षम् उपमानोपमेयभावकल्पनया उपमालङ्कार-व्यङ्ग्येन राजपक्षस्य उत्कृष्टतां साधयति।

उपमालङ्कारव्यङ्ग्येन सहृदयानां चित्तदशा राजपक्षस्य उत्कृष्टतारूपा चित्तदशा प्रकाश्यते।

**व्यतिरेकालङ्कारव्यङ्ग्यचर्वणायाम् –**

**या स्थविरमिव हसन्ती कवि-**
**वदनाम्बुरुहबद्धविनिवेशा**
**दर्शयति भुवनमण्डलमन्य-**
**दिव जयति सा वाणी।।१२**

अत्र ''स्थविरमिव हसन्ती'' इति उत्प्रेक्षालङ्कारेण चमत्कारैककारणं नवं नवं जगद्, अजडासनस्था ब्रह्मसृष्टेरपेक्षया कविसृष्टिः उत्कृष्टा इति व्यतिरेकालङ्कारव्यङ्ग्यः व्यज्यते।

अलङ्कारव्यङ्ग्यचर्वणायाम् अर्थालङ्कारेषु एव भिन्ना भिन्ना चित्तदशा दृश्यते।

व्यङ्ग्याभावे तु शब्दानां वाच्यार्थानां च सौन्दर्यमेव अस्माकं चित्तं लभते –

**शब्दालङ्कारस्य सौन्दर्यम् –**

**स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-**
**मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः।**
**भिद्यादुद्यदुदारदर्दुरदरी दीर्घादरिद्रद्रुम-**
**द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम्।।१३**

अत्र श्लेषालङ्कारस्य सौन्दर्यं प्रति सहृदयानां सामाजिकानां चित्तमागच्छति।

**अर्थालङ्कारसौन्दर्यम् –**

**विनिर्गतं मानदमात्ममन्दिराद्**
**भवत्युपश्रुत्य यदृच्छयापि यम्।**
**ससम्भ्रमेन्द्रद्रुतपातितार्गला**
**निमीलिताक्षीव भियामरावती।।**

अत्र भिया निमीलिताक्षीव अमरावती इति उत्प्रेक्षालङ्कारो वर्तते। उत्प्रेक्षाऽलङ्कारचमत्कारात् अन्यद् राजविषयकरतिभावं प्रति ध्यानं नैव सामाजिकैः क्रियते। अनेन प्रकारेण वस्त्वलङ्कारव्यङ्ग्यचर्वणायां सामाजिकानां सहृदयानां पाठकानां दर्शकानां भिन्ना-भिन्ना चित्तदशा अनुभूयते।

पूर्वव्याख्याता ( संस्कृतवाङ्मयम् )
श्रीदिगम्बरजैन-आचार्य-संस्कृतमहाविद्यालयः, जयपुरम्

11 तत्रैव पृष्ठसंख्या - १४८
12 तत्रैव पृष्ठसंख्या - १५८
13 तत्रैव पृष्ठसंख्या - ३०
14 तत्रैव पृष्ठसंख्या - ३२

# राष्ट्रीय-शब्दस्य पाणिनीयता निर्बाधा

❑ डॉ. रामशंकर भट्टाचार्यः
सम्पादकीया टिप्पणी

**''राजश्यालस्तु राष्ट्रिय'' इत्यर्थे संस्कृतवाङ्मये चिरप्रयुक्तो राष्ट्रियशब्दः पाणिनेः सूत्रेण 'घ' प्रत्यये कृते निष्पद्यते। सूत्रमिदमनुसरन्तो लक्षणैकचक्षुष्का ''नेशनल'' इत्यर्थेऽपि राष्ट्रिय शब्द एव प्रयुज्यतामिति निर्बन्धपराः। अपरे तु ''तत्र भव'' इत्यर्थादितरत्र राष्ट्रे हितः, राष्ट्रस्यायम् इत्याद्यर्थेषु 'वृद्धाच्छ' इत्यनेन कृतेन छप्रत्ययेन राष्ट्रीयशब्दो निष्पाद्यतामित्यभिप्रयन्ति। 'सोऽस्य निवासः' (4/3/87) इत्यर्थेऽपि छ प्रत्यये कृते राष्ट्रीय इति व्युत्पद्यते। सर्वेषु आप्टेप्रभृतिनिर्मितेषु शब्दकोषादिषु राष्ट्रीयशब्दो निर्दिष्टोऽपि, प्रयुज्यतेऽपि। अनेन राजश्यालार्थे रूढस्य राष्ट्रियशब्दस्यार्थभ्रान्तिरपि निवार्येतेति तेषामाशयः। एवं स्थिते किमस्माभिर्निर्णेतव्यम्? अस्मिन्नेव प्रसङ्गे वाराणसेयानां वैयाकरणानां विद्वद्वररामशंकरभट्टाचार्याणां लेखोऽयम् अमृतलताख्यपत्रिकातः साभार-मुद्ध्रियते।**

**प्रधानसम्पादकः**

राष्ट्रीयशब्दोऽपाणिनीय इति केचिदातिष्ठन्ते। एते खलु राष्ट्रियशब्दस्यैव साधुत्वं संगिरन्ते। अस्मन्मते राष्ट्रिय-राष्ट्रीय-शब्दावुभावपि साधू इति। तदेतदुपपाद्यते राष्ट्रियशब्द एव साधुरिति ये मन्यन्ते ते वदन्ति यतो हि **'राष्ट्रावारपाराद् घखौ'** (अष्टा. ४/२/९३) इति पाणिनि-सूत्रेण राष्ट्रशब्दाद् घ--प्रत्यय एव विहितः सर्वासु तद्धितवृत्तिषु (घः=इयः), अतो राष्ट्रियेति शब्द एव साधुः स्यात्। राष्ट्रशब्दात् छ प्रत्ययस्य प्रवृत्तिर्नानुशिष्टा भगवता पाणिनिना, अतो राष्ट्रीयेति शब्दस्य सत्ताऽकल्पनीयेति।

मतमिदमेकदेशदर्शनपरमित्यास्माकीना दृष्टिः। यदि नाम सर्वासु तद्धितवृत्तिषु राष्ट्रशब्दाद् घ-प्रत्यय एव स्यात् तर्हि शिष्टाभ्युपगतो राष्ट्रिकशब्दः कथं दृष्टिपथमागच्छेत्। **मनुस्मृतौ (१०/६१) राष्ट्रिकपदमुपलभ्यते। राष्ट्रिकैः राष्ट्रवासिजनैरिति कुल्लूकभट्टः।** अत्र राष्ट्र शब्दाद् यः इकप्रत्ययो विहितः स तद्धित एव।

अत्र केचिद् वदन्ति- 'भवतु नाम केनचिदुपायेन शिष्टप्रयुक्तस्य राष्ट्रिकशब्दस्य सिद्धिः राष्ट्रीयशब्दस्तु न व्याकरणप्रक्रियासिद्धो न वा शिष्टप्रयुक्त इत्यतस्तस्यासाधुता' सिद्धैवेति। उच्यते- **'राष्ट्रावारपाराद् घखौ'** (४/२/९३) इति सूत्रस्य प्रवृत्तिः न खलु कृत्स्ने तद्धितप्रकरणे, प्रत्युत शैषिकप्रकरणपर्यन्ता एवास्य प्रवृत्तिः, अर्थात् ४/३/१३३ पर्यन्ता ये अर्था उक्ताः 'जात-मत-व्याख्यान-संभूत-आगत-अभिजन-भक्ति-' इत्यादयः, तेष्वर्थेषु राष्ट्रशब्दाद् ४/२/९३ सूत्रविहितः घ-प्रत्यय एव स्यात्। अतएव भक्तिरिति सूत्रस्योदाहरणे (४/३/९५) **तस्येदम्** (४/३/१२०) इति सूत्रस्योदाहरणे च राष्ट्रियपदं प्रयुक्तं काशिकायाम्। यदि बाधकं न स्यात् तर्हि उदाहृतेषु सर्वेषु स्थलेषु घ-प्रत्यय एव स्यादित्यत्र न संशयलेशोऽपि।

परन्तु ४/३/१३४ सूत्रादारभ्य ये विकारादयोऽर्थाः, तेष्वर्थेषु राष्ट्रशब्दात् तत्तत्प्रकरणविहिताः प्रत्यया एव यथायथं भवेयुः, न तु ४/२/९३ सूत्रविहितो घ-प्रत्ययः, तस्य निवृत्तेः। **'प्राग्दीव्यतोऽण्'** इति सूत्रोक्तः अण् प्रत्ययस्तु विकाराद्यर्थेष्वपि भवितुमर्हति यथा- शास्त्रम्, यतो हि **'दीव्यति'** सूत्र (४/४/२) पर्यन्तः तस्याधिकार उक्तः सूत्रे एव (४/१/८३)। अथ च ४/३/१३४ सूत्रतो ये विकारादयोऽर्था उपदिष्टाः, तेषु घ-प्रत्ययस्य प्रवृत्तिर्न स्यादिति स्पष्टमाहुर्वृत्तिकृतः- **'तस्य प्रकरणं तस्येति पुनर्वचनं शैषिकनिवृत्त्यर्थम्'** इति (४/३/१३३)।

अस्य निषेधस्य प्रयोजनं तु इदमेव यद् विकारावयववादिषु अर्थेषु घादयः प्रत्ययाः न स्युरिति, अर्थात् '**तस्य विकारः**' (४/३/१३३) इत्यादिप्रकरणे राष्ट्रशब्दात् घ-प्रत्ययो न भवेदिति। एवं सति चतुर्थाध्यायगत-चतुर्थपादे येऽर्थाः सन्ति, तेषु राष्ट्रशब्दाद् घ-प्रत्ययो न स्यात्, यथायथमन्ये प्रत्ययास्तु स्युरेव। पञ्चमाध्यायतः छ-प्रत्ययः (छ = ईयः) तु राष्ट्रशब्दाद् हितार्थे भवितुमर्हत्येव।

यतो हि तद्धितप्रकरणे घ-प्रत्ययः असार्वत्रिकः, अतो राष्ट्रिकेति शब्दे ठन् प्रत्ययकरणे सम्यगेव। अत एव सत्यां शास्त्रप्रवृत्तौ राष्ट्रशब्दात् छ-प्रत्ययोऽपि स्यादेव, ततश्च राष्ट्रीयशब्दोऽपि साधुरेव मन्तव्यः। शैषिकाधिकारबहिर्भूत-प्रकरणे '**तस्मै हितम्**' (५/१/५) इत्यर्थे यदि छ प्रत्ययः स्यात् तर्हि राष्ट्राय हितम्= राष्ट्रीयम् इति कथनं साध्वेव स्यात्। अस्मिन् हितार्थे घ-प्रत्ययस्य प्रयोगो न भवितुमर्हति, एतस्मादर्थात् प्रागेव तस्य निवृत्तेः। तथैव '**तदस्य तदस्मिन् स्यादिति**' (५/१/१६) '**तदर्हति**' (५/१/६३) इत्यादिष्वर्थेषु अपि यथायथं कश्चिदपि प्रत्ययः (ठक्-ठन्-अणादीनामन्यतमः) भवेदेव, न पुनर्घ-प्रत्ययः ४/२/९३ सूत्रविहितः। यथा वैयाकरणानां मते 'पापाय हितम्' इत्यर्थे पापीय इति भवति, तथा राष्ट्राय हितं इत्यर्थे राष्ट्रीयमिति साध्वेव स्यात्।

राष्ट्रीयेति पदस्य प्रयोगो राजनीतिग्रन्थेष्वन्वेष्यः। वैदिकग्रन्थेषु चास्य प्रयोगो दृश्यते (**मैत्रायणीसंहिता** २/१/१२; **काठकसंहिता** ३७/११)। **स्कन्दपुराणेऽपि राष्ट्रीयपदमुपलभ्यते (वैष्णवखण्ड, वैशाखमासः** ११/४७)। रामतर्कवागीशः मुग्धबोधटीकायां राष्ट्रीयशब्दं प्रायुङ्क्तेति विज्ञेयं (तद्धित, ४३३ सूत्र)। अतः राष्ट्रीय-शब्दः साधुरेव।

**टिप्पणी**- राष्ट्रिकेति अमरे वनौषधिवर्गे। आहात्र स्वामी- **'राष्ट्रमस्ति अस्या राष्ट्रिका' इति (२/४/९५)। अत्र ५/२/११५** सूत्रविहितः ठन्प्रत्यय इति भानुजि-दीक्षितेनोक्तम्।

---

# निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.- 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

**नाम.................................पुत्र/पुत्री श्री..........................भवन संख्या...........**

**गली/ मोहल्ला/कॉलोनी..............................वाया/पोस्ट ऑफिस.........................**

**तहसील.............................जिला......................राज्य.........................**

**देश..................पिन.....................................दूरभाष............................**

**मोबाईल नं..........................ईमेल...................................................**

**निवेदक सुदामा शर्मा, प्रबन्ध सम्पादक**

**भारती संस्कृत मास पत्रिका**

**बी-15, भारती भवन, न्यू कॉलोनी, जयपुर-302001 (राज.) दूरभाष-2379014**

ई-मेल - sanskritbharti09@gmail.com

# दशरथद्विवेदिरचितजानकीजीवनमहाकाव्यस्य प्रथमसर्गस्य वैशिष्ट्यम्

❑ डॉ. प्रहलादकुमारशर्मा

प्रथमःसर्गःसम्पूर्णमहाकाव्यस्य भूमिका वर्तते। इदं सर्गान्ते स्वकीयं परिचयं प्रस्तुवता कविनैव स्वीकृतम्–

**मा प्यारीरघुनाथ आप्तचरितस्तातस्तु गर्गान्वय–**
**स्तेषां वेदसुतेष्वभूद्दशरथस्सूनुस्तृतीयः कृती।**
**सार्वार्यो रघुनाथभामनिरतः श्रीजानकीजीवनं,**
**काव्यं चारु चकार तस्य प्रथमः सर्गोऽयमाभूमिकः।।**[1]

प्रथमसर्गे मङ्गलं कुर्वता कविना गुरवः, देवाः, महाकवयः आलङ्कारिकाश्च स्तुताः। अस्य काव्यस्य प्रारम्भो गुरुस्तवेनैव भवति। तत्र कविः कथयति यद् एषां शास्त्रप्रदीपानां गुरूणां विद्यार्कमरीचिमाला लोकस्य घनान्धकारं धुनोति। तामहं स्वेष्टसिद्ध्यै नमामि–

**श्रुतिस्वरूपानिह शास्त्रदीपान् गुरून्नमामीशमिवेष्टसिद्धौ।**
**यदीयविद्यार्कमरीचिमाला धुनोति लोकस्य घनान्धकारम्।।**[2]

देवस्तुतिप्रसङ्गे सरस्वती, पार्वती, गणेशः, दिनेशः, शिवः, हनुमान्, दत्तात्रेयः, रामश्च स्तुताः। तत्र सरस्वत्या–यथा–

**यदब्जसस्मेरकटाक्षविप्रुल्लवं समासाद्य नितान्तग्रावा।**
**अमन्दमानन्दसुधां प्रसूते त्रिविग्रहां तामिह वाचमीडे।।**[3]

पार्वत्या यथा–

**त्रयीमयीं प्राणमिवेन्दुमौलेः विवर्तभावाहितविश्वरूपाम्।**
**नगेन्द्रकन्यां जननीं जगत्यास्तापोपशान्त्यै प्रणमामि नित्यम्।।**[4]

कविस्तुतिप्रसङ्गे वाल्मीकिः, व्यासः, भासः, कालिदासः, अश्वघोषः, बाणभट्टः, माघः, भट्टनारायणः, भवभूतिः, हर्षवर्धनः, राजशेखरः, श्रीहर्षः, क्षेमेन्द्रः, जयदेवः, मुरारिः, अभिनन्दः, पण्डितराजः, रामचरित–मानसकारः तुलसीदासश्च स्मृतः।

तत्र वाल्मीकिर्यथा–

**आसाद्य प्राचेतसमादिकाव्ये वागेव विद्धाण्डजजातशोकात्।**
**छन्दोमयी श्लोकमयी बभूव तामीडये रामकथानुरक्ताम्।।**[5]

व्यास यथा–

**सरस्वतीवर्षमिवाभिरामं चकार यो भारतविश्वकोषम्।**
**तमागमागम्यविहारशीलं व्यासं नमामीह पुराणभृङ्गम्।।**[6]

तुलसीदासो यथा–

**काव्येषु रामं विनिबध्य लोके के नाऽभिवन्द्याः कवयो बभूवुः।**
**कृत्वा ततो रामचरित्रकाव्यं जातोऽभिनन्दोऽपि सदाभिवन्द्यः।।**[7]

ततः कविना कालिदासस्य काव्यस्य च वैशिष्ट्यं प्रतिपादितम्। ततोभारतवर्णने भारतीया संस्कृतिः, नद्यः, पर्वताः जनाश्च वर्णिताः। हिमालयस्यापि सविस्तरं वर्णनं विहितम्। तत्र नेपालः मिथिला, तीरभुक्तिश्च वर्णिता। ततो कविना प्रतिपादितं यत् सर्वेऽपि निमिवंशजा जनकनाम्ना कथ्यन्ते। निमिनामको राजा मिथिलायां बभूव। स एव जनक उच्यते। तदुद्भवे तस्यैव वंशेह्रस्वरोमा राजा जातः, यस्य सीरध्वजः पुत्र आसीत्। नयप्रियो धर्मात्मा सीरध्वजः स्वराज्यं धर्मेण पालयति स्म। सीरध्वजयशोवर्णने तस्य राज्यपालनं कविनैवं वर्णितं – यथा–

**उदारदक्षे नृपतौ प्रजासु गुणान्निधत्ते प्रकृतिर्निसर्गात्।**
**प्रजास्ववर्धन्त गुणाभियोगाः सीरध्वजे शासति शास्त्रबुद्ध्या।।**
**अनुग्रहाऽवग्रहयोर्विधाता क्षेमं च योगं विदधन्नयेन।**
**अन्वर्थनामा जनको बभूव राजा प्रजानामनिशं मनीषी।।**
**राज्ञोऽस्य क्रोडे करुणैकमूर्तिः सीताऽगमिष्यत्यनुमीयमाना।**
**इतीव मन्येऽस्य प्रजा बभूव सर्वोपधाशून्यदयैकमूर्तिः।।**[8]

मिथिलावर्णनप्रसङ्गे कविना वर्णितं–

**तारुण्यलावण्यतरङ्गितानामत्राङ्गनानां मणिनूपुराणि।**
**पदक्रमे छात्रवदुत्स्वनन्ति सीतेति सीतेति च शिञ्जितेषु।।**[9]

एवं सर्गोऽयं समाप्तिमेति। कविनात्र कविप्रभृतीनां वर्णने इतिहासक्रम आदृतः।

रा.व.उपा. संस्कृत विद्यालयः, सामोद, जयपुरम्

1 जानकीजीवनम् पृ.सं. २१ 2 जानकीजीवनम् १/१
3 जानकीजीवनम् १/२ 4 जानकीजीवनम् १/३
5 जानकीजीवनम् १/४ 6 जानकीजीवनम् १/५
7 जानकीजीवनम् १/२० 8 जानकीजीवनम् १/७०७/११०
9 जानकीजीवनम् १/९५

रोगविमर्शः

# ज्योतिषशास्त्रे स्त्रीसम्बद्धरोगविमर्शः

❑ वन्दना शर्मा

प्राचीनकालादेव ज्योतिषशास्त्रं लोकोपकारक-शास्त्रत्वेन संसारे प्रसिद्धम् आसीत्। ज्योतिषमाध्यमेन मनुष्याणां सुख-दुःख-रोग-व्यापारादीनां शुभाशुभयो-ज्ञानस्य महती परम्पराऽसीत्। वर्तमानसमयेऽपि जीवनस्य समस्तावश्यकतत्त्वानां विचारः विमर्शश्च ज्योतिषमाध्यमेन सम्यक्तया क्रियते। आधुनिकयुगेऽ-स्मिन् विविधरोगाणां प्रभावेण मनुष्याः त्रस्ताः दृश्यन्ते। उक्तञ्च-**शरीरं व्याधिमन्दिरम्।**

**मिथ्याहारविहाराभ्यां दोषाः ह्यामाश्रयाः स्थिताः** अनेन वचनेन वयं कथयितुं शक्नुमः यत् स्वक्रियाकलापेनैव मनुष्याः इदानीं रोगपीडिताः दृश्यन्ते। कष्टयुक्तशरीर-वशात् मनुष्यः आध्यात्मिकादि-कार्येभ्यः विमुक्त इव व्यवहरति अतः ज्योतिषशास्त्र-माध्यमेन रोगबाधां ज्ञात्वा निवारणाय प्रयासः करणीयः। विभिन्नजातकग्रन्थेषु मनुष्याणां रोगविचारः शान्त्युपायाः च कथिताः। एषः तु बृहद्विषयोऽस्ति यत् पुरुषेषु कानि रोगकारणानि स्त्रियां च कानि अतः मया इदानीं केवलं स्त्रीसम्बद्धरोगाणां विचारः क्रियते।

स्त्री परिवारस्य धुरी कथिता। प्राचीनकाले फलित-ज्योतिषज्ञैः स्त्रीसम्बद्धविविधरोगाणां विचारः क्रियते। स्त्रीणां स्वास्थ्ये कल्याणञ्च सम्पूर्णपरिवाराय समाजाय चावश्यकं वर्तते अतः स्त्रीसम्बद्धरोगविचारः तु इदानीं प्रासंगिको वर्त्तते। स्त्रीसम्बद्धविवधरोगाणां परिशीलनस्य प्रयासः अस्मिन् लेखे मया कृतः-

1. यदि भौमस्य नवमांशे सप्तमे भावे च शनिदृष्टः तर्हि स्त्री गुप्तरोगेण पीड़िता कथितव्या।
2. यदि षष्ठे स्थाने पापग्रहद्वयं प्रथमे च शुभग्रहः पापग्रहो वा तर्हि स्त्री रोगिणी कथितव्या।
3. जाया-भावस्य स्वामी पापग्रहस्तस्य राशौ पापग्रहो वा तिष्ठेत् तर्हि स्त्री गुप्तरोगंपीड़िता कथितव्या।
4. यदि शुक्रो वृश्चिकराशौ तिष्ठेत् तर्हि स्त्री रोगिणी ज्ञातव्या।
5. यदि चतुर्थभावस्थः द्वादशभावस्थो वा मंगलस्तथा च सप्तमे स्थाने शुक्रश्चन्द्रो वा तिष्ठेत् तर्हि रक्तस्रावेण स्त्री म्रियते पीडिता वा भवति।
6. यदि स्त्रीजातिकायाः कुण्डल्या अष्टमे भावे चन्द्रः राहुः मङ्गलः च तिष्ठन्ति सप्तमे भावे च बुधशनियुतिः दृश्यते तर्हि स्त्रियाः गर्भाशये कर्कटरोगः कथितव्यः।
7. स्त्रीजातिकायाः चतुर्थस्थाने राहु-चन्द्र-शनि ग्रहाणां युतिर्दृश्यते तथा च सूर्येण भौमेन च दृष्टः तद्भाव-तर्हि स्तनकर्कटरोगः कथितव्यः।
8. तनुभावस्थः सूर्यः पञ्चमस्थो राहुः गर्भपातं कारयति।
9. सूर्यः लाभस्थः पञ्चमभावः पापग्रहैः पीडितः शुभग्रहदृष्टिहीनः च तर्हि प्रसवपूर्वात् गर्भहानिः कथितव्या।
10. वृश्चिकलग्ने पञ्चमभावस्वामी अष्टमस्थः भवेत् तर्हि गर्भपातः कथितव्यः।
11. यदि पञ्चमभावस्य स्वामी सप्तमभावस्थः, सप्तमेशः, पापग्रहैः पीडितो भूत्वा षष्ठे अष्टमे वा स्थाने तथा शुक्रो निर्बलः भवेत् तर्हि स्त्री गर्भस्रावेण पीडिता कथितव्या।
12. यदि चन्द्रराहुकेतुभ्यां पीडितः भौमदृष्टः च भवेत् तर्हि स्त्री गर्भस्रावेण पीडिता ज्ञातव्या।
13. नीचस्थशुक्रः नवांशेशात् सप्तमस्थः दृष्टः तर्हि महिला गर्भस्रावेण पीडिता ज्ञातव्या।

एतदतिरिक्तं यदि कस्यापि जातकस्य कुण्डल्यां स्त्रीसम्बद्धग्रहाः पीडिताः दृश्यन्ते तर्हि जातकस्य स्त्री रोगिणी ज्ञातव्या। केषाञ्चित् प्रमुखरोगाणां परिचयः निम्नलिखितो वर्त्तते –

**1. रक्तप्रदर रोग** – शुक्रयुतकेतुर्यदि उपपदे द्वितीये भावे वा तिष्ठति तर्हि जातकस्य स्त्री रक्तप्रदररोगेण पीडिता कथितव्या।

**उपपदे च द्वितीये वा, शिखिशुक्रौ स्थितौ यदा।**
**रक्तप्रदररोगार्त्ता, जायते तस्य भामिनी।।**

(बृ. पाराशरहोरा पृ.सं. ११८ श्लोक सं. १७)

**2. अस्थिस्त्रावरोगः** – यदि जातकस्य जन्माङ्गे उपपदस्थः द्वितीयभावस्थः केतुबुधयोर्युतिर्दृश्यते तर्हि अस्थिस्त्रावेण पीडिता स्त्री ज्ञातव्या।

**उपपदादिषु संयोगो, बुधकेत्वोर्किजोत्तमः।**
**अस्थिस्त्राव युता बाला, गृहे तस्य न संशयः।।**

(बृ. पाराशरहोरा पृ.सं. ११९ श्लोक सं. १८)

**3. नासिकारोगः** – उपपदलग्ने भौमराशि बुधराशिः वा तिष्ठेत् तथा च शनिभौमयोर्युतिर्दृश्यते स्त्री नासिकारोगेण पीडिता कथितव्या।

**उपपदे बुध क्षेत्रे, भौमर्क्षो चाथवा द्विज**
**मन्दारौ संस्थितौ तत्र, नासिकारोगयुक् भवेत्।**

(बृ. पाराशरहोरा पृ.सं. ११९ श्लोक सं. २१)

**4. कर्णनेत्ररोगः** – उपपदलग्ने यदि भौमस्य बुधस्य वा स्थितिः भवेत् तस्मिन् च लग्ने शनिबृहस्पतियुतिर्दृश्यते तर्हि जातकस्य स्त्री कर्णनेत्ररोगाभ्यां पीडिता ज्ञातव्या।

**यदि तंत्र युतो सौरिर्गुरुणा, सहितो भवेत्।**
**कर्णरोगवती बाला, नेत्ररोगयुता तथा।।**

(बृ. पाराशरहोरा पृ.सं. ११९ श्लोक सं. २२)

**5. दन्तरोगः** – यदि उपपदलग्नं मंगलबुधयोश्च युतिः तर्हि जातकस्य स्त्री दन्तरोगिणी कथिव्या। उपपदस्थौ बृहस्पतिराहू दन्तरोगं कारयतः।

**कुज सौम्यौ चान्यक्षेत्रे, उपपदे द्विजोत्तम।**
**योगे स्वर्भानु देवेज्यौ, दन्तार्ता गृहिणी भवेत्।।**

(बृ. पाराशरहोरा पृ.सं. ११९ श्लोक सं. २३)

**6. वातव्याधिरोगः** – उपपदलग्नस्थशनिः कुम्भराशेः मीनराशेः वा यदि उपपदलग्नं स्यात् तर्हि जातकस्य स्त्री वातरोगेण पीड़िता कथिता।

**उपपदे च कुम्भस्थे, मीनस्थेऽपि तथा द्विज।**
**शनि स्वर्भानु योगश्चेत्, पङ्ग्वङ्गी तस्य भामिनी।।**

(बृ. पाराशरहोरा पृ.सं. ११९ श्लोक सं. २४)

**7. उदरकृमिरोगः** – सप्तमस्थः चन्द्रः भौमः वा जातकस्य स्त्रियामुदररोगं कारयति। सप्तमस्थः शनि अपि उदररोगं कृमिरोगं वा कारयति।

**तथाविधौ भूमिसूतेऽस्य संस्थे,**
**व्रणेन यद्वाऽप्युदरामयेन।**
**मन्देऽस्तसंस्थे कृमिणा जलेन,**
**यद्वा गृहेशी म्रियतेऽब्जवक्त्रा।।**

(शभु होराप्रकाश पृ.सं. १५८ श्लोक सं. १४९)

**8. विकृतयोनिरोगः** – सप्तमलग्नस्थराशी यदि नवमांश-कुण्डल्यां मंगलयुक्ता तथा च मंगलः शनिदृष्टः भवेत् तर्हि स्त्रियाः योनिः विकृता कथितव्या।

**9. गर्भच्युतिरोगः** – पञ्चमभावः पापग्रहयुक्तः तथा च पापग्रहैः दृष्टः तर्हि स्त्रिया गर्भच्युतिः कथितव्या।

**सुते पापयुतदृष्टे गर्भच्युतिः।**

(जातकतत्त्व पृ.सं. २३० श्लोक सं. ८३)

**10. गर्भपातरोगः** – लग्नस्थः शनिः भौमश्च गर्भपातकारकौ स्तः। लग्नस्थः चन्द्रः चन्द्रदृष्टलग्नः वाऽपि स्त्रीणां गर्भपातकारकः भवति।

**यमारौ लग्नगौ स्त्रीणां गर्भस्त्रावस्तथा विधौ।**
**तद्भे दृष्टे तद्युते वा गर्भपातः प्रजायते।।**

(जातकतत्त्व पृ.सं. २३०)

सम्प्रति रोगाणां ज्ञानं विलम्बेन भवति। अनेन केचन रोगाः मृत्युकारकाः भवन्ति। अतः सर्वविधदुः-खितानामभिज्ञानं ज्यौतिषेन सम्भवति एतद् मत्वा शीघ्रमेव नवीनरोगाणां चिकित्साकृते प्रयासः करणीयः। पाञ्चभौतिके निर्मिते शरीरेऽस्मिन् सर्वे पदार्थाः यदि सम्यक्रूपेण संस्थिताः भवन्ति तर्हि रोगाणामुत्पत्ति-सम्भावना क्षीणा भविष्यति अतः अस्माभिः स्वस्थ-जीवनचर्यायाः पालनमवश्यमेव करणीयम्।

**शोधच्छात्रा,**
ज.रा.रा.सं.वि.वि., जयपुरम् (राज.)

# किरातार्जुनीयमहाकाव्ये अर्थशास्त्रीयविषयाः

❑ डॉ. हेमराजशर्मा

किरातार्जुनीयमहाकाव्यस्य रचयिता भारविः संस्कृतसाहित्ये महाकविपदत्वेन विख्यातोऽस्ति। तत्र महाकाव्यस्य विचित्रमार्गप्रवर्तकतया भावपक्षापेक्षया कलापक्षस्य प्रवर्तकतया च महाकविर्भारविः भारतीय-संस्कृतसाहित्ये विशिष्टं स्थानं भजते। पाण्डित्य-प्रकर्षस्याभिव्यक्तिः मूलविषयस्य परित्यागेन विस्तृत-वर्णनानि चास्य महाकाव्यस्य वैशिष्ट्यं तत्र विचित्रमार्गस्य स्वीकरणादिति। अस्यैव महाकवेः पदापेक्षया भारवेः समकालिकास्तदन्ये च महाकवय एनमेव विचित्रमार्ग-मवलम्ब्य कलापक्षं स्वीकुर्वन्तः स्वस्वग्रन्थरचनादीन् कृतवन्त इति। भारतीयसंस्कृतसाहित्यस्य महाकवि-भारवेः जीवनस्य विषये कियन्त्यः किंवदन्त्यः सन्ति येन तस्य जीवनस्य विषये यद्यपि न किंचिदपि कथयितुं शक्यते निश्चयेन तथापि केषाञ्चन ग्रन्थानां महाकवीनां च व्याख्यानस्याधारेण किञ्चिज् ज्ञातुं शक्यते। तत्र

**येनायोजि नवेऽश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म।**
**स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः।।**[1]

तत्र दाक्षिणात्यकौशिकब्राह्मणगोत्रोत्पन्नोऽयं भारविः दण्डिरचितावन्तिसुन्दरीकथाया आधारेण दक्षिणस्याम् अचलपुरग्रामनिवासिनः कौशिकगौत्रीयनारायणस्वामिनः पुत्र आसीत्। दामोदर इत्यपरनामधेयो भारविः चालुक्य-वंशीयनृपस्य विष्णुवर्धनस्य सभायां विशिष्टं स्थानं लब्धवान्। महाकविभारवेरद्वितीया कृतिरस्ति किराता-र्जुनीयमहाकाव्यमिति। महाकविनाऽत्राऽष्टादशसु सर्गेषु कथायाः निबन्धनं कृतम्। कविना तत्र भारतीयसंस्कृतेः प्राणभूतानामनेकेषां शास्त्राणां धर्मशास्त्रज्यौतिष-राजनीतिवेदादीनां सांगोपांगवर्णनतया नीरसकथावस्तुनो रसास्वादनयोग्यत्वं सम्पादितम्।

**नारिकेलफलसन्निभं वचो भारवेः सपदि यद्विभज्यते।**
**स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिकं यथेप्सितम्।।**[2]

तत्र 'उपमा कालिदासस्य भारवेरर्थगौरवम्' इति श्रुत्या भारवेः अर्थस्य गौरवं गाम्भीर्यं वा जगति प्रसिद्धं वर्तते। भारवेः काव्ये गीतिमयमाधुर्यापेक्षया वर्णनात्मक-शैल्याः प्राधान्यमस्ति। यद्यपि कालिदाससमं सुश्लिष्टः पदविन्यासो नास्ति तत्र परं चाऽर्थगौरवमयपदानां विन्यासे भारविः पूर्णरूपेण सफल इति। तत्र भारविः राजनीति-शास्त्रविषयकस्यार्थगौरवस्य महत्त्वं प्रस्तूयते-

**व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।**
**प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृतांगान्निशिता इवेषवः।।**[3]

तत्र बृहत्त्रय्यामन्यतमस्य सर्वप्रमुखस्य च किरातार्जुनीयस्य महत्त्वं राजनीतिशास्त्रसापेक्षेणापि संस्कृतसाहित्ये वरीवर्तते। अत्र हि प्रायेण सकलशास्त्रसमवेतत्वेन अर्थशास्त्रस्य विभिन्नविषयाणां सप्रासंगिकं वर्णनं समुपलभ्यते। तत्र दूतव्यवस्था, गुप्तचरव्यवस्था, उपायचतुष्टयं, प्रकृत्यङ्गानि, मन्त्रकार्यं षाड्गुण्यमित्यादयो हि विषयाः प्रमुखत्वेन समाहिता दृश्यन्ते। अत्राऽस्माभिरेतेषामेवार्थशास्त्रीयतत्त्वानां समालोचनं कौटिलीयार्थशास्त्रसमवेतत्वेन किरातार्जुनी-यमहाकाव्ये सम्पाद्यते। तत्र-

**१. दूतव्यवस्था -**

**'दूतमुखा वै राजानः'**[4] इत्यर्थशास्त्रोक्तवचन-प्रमाणेन राजनीतिशास्त्रे दूतस्य महत्त्वमस्माभिर्दृश्यते। दूतव्यवस्था राज्यशासनव्यवस्थायाः प्रमुखमङ्गं वर्तते येन हि राजानः परनृपान् वशीकर्तुमथवा स्वशासनस्य सुव्यवस्थिततत्वं कर्त्तुं शक्नुवन्ति। तत्र कौटिलीयार्थशास्त्रे दूतविषये उच्यते यत्- **'उद्धृतमन्त्रो दूतप्रणिधिः'**[5] इति। पुनश्चास्यैव दूतस्य त्रयो भेदाः कौटिल्येन निर्दिष्टास्तत्र- **निसृष्टार्थः, परिमितार्थः शासनहरश्चेति।** तत्रास्यैव दूतस्यार्थशास्त्रविषयकस्य स्वीये किरातार्जुनीये महाकाव्ये प्रसंगानुगतं वर्णनं चकार। तत्र प्रथमे सर्गे दुर्योधनस्य सुशासनव्यवस्थाया वर्णने दूतमाध्यमेन सर्वेषां विरोधिराज्ञां वृत्तान्तज्ञानं राजनीतिककुशलतायाः परिचयं ददाति-

**महीभृतां सच्चरितैश्चरैः क्रियां स वेद निःशेषमशेषितक्रियः।**
**महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः।।**[६]

तत्र दूतस्य कार्यस्य निर्वाह एव सर्वोत्तमो गुणो मन्यते अतोऽत्र चतुर्दशे सर्गे वनेचरस्य सर्वोपयुक्तत्वमाह-

**समस्य संपादयता गुणैरिमां त्वया समारोपितभार भारतीम्।**
**प्रगल्भमात्मा धुरि धुर्य वाग्मिनां वनेचरेणापि सताधिरोपितः।।**[७]

एवं दूतस्य वैशिष्ट्य-वर्णनानि तत्र किराता-र्जुनीयमहाकाव्ये प्रचुरेण समुपलभ्यन्ते। सन्धिविग्रहादि-कार्यव्यापृतोऽयं दूतो मनुना ८ प्रोच्यते।

**२. गुप्तचरव्यवस्था-**

तत्र **'चारचक्षुषो राजानः'** इति गूढपुरुषविषयक-वर्णनमर्थशास्त्रे प्राप्यते। कौटिल्येन यत्र तत्र गुप्तचरशब्दस्य स्थाने गूढपुरुषशब्दस्य प्रयोगो विधीयते। कौटिल्येन निर्दिश्यते यत् स्वामिना धर्मोपधाद्युपायैः संपरीक्ष्यैव गूढपुरुषा नियोक्तव्याः-

**उपधाभिः शुद्धामात्यवर्गो गूढपुरुषानुत्पादयेत्।**[९]

तत्रार्थशास्त्रे दशमेऽध्याये गूढपुरुषाणां नवभेदानां वर्णनं क्रियते कौटिल्येन। तत्राद्यपंचभेदाः 'संस्था' इत्यपराश्च संचारनामधेया इति। तत्र **कापटिक-उदास्थित-गृहपतिक-वैदेहक-तापसा** इति संस्थायां तथा च **सत्रि-तीक्ष्ण-रसद-भिक्षुक्यः** संचारे चेति।

तत्र किरातार्जुनीये महाकाव्ये गुप्तचरस्य गूढपुरुषस्य वा विषयका नैके प्रसंगा दृग्गोचरीभवन्ति। राजनीतिप्रधानग्रन्थत्वादस्य महाकाव्यस्य अर्थशास्त्रीय-महत्त्वं वरीवर्तते तदेव महाकाव्यस्य मंगलश्लोक एवास्माभिर्दृश्यते तत्र युधिष्ठिरेण ब्रह्मचारिवेशयुक्तोऽयं गुप्तचरो दुर्योधनस्य सर्ववृत्तान्तं परिज्ञाय युधिष्ठिरस्य सकाशे आगतः -

**श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।**
**स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः।।**[१०]

तत्रैव प्रसंगान्तरेण तस्य गूढपुरुषस्य वनेचरस्य स्वाभाविकगुणानां वैशिष्ट्यं कथयतोच्यते यद् गुप्तचरोऽयमृषत्वेन सत्यवार्तां करोति-

**कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।**
**न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।।**[११]

**३. षाड्गुण्यम्-**

राजनीतिशास्त्रप्रतिपादितस्य षाड्गुण्यस्य महत्त्वं सर्वत्राऽस्माभिर्दृश्यते। आचार्यकौटिल्येन तत्र स्वीयेऽर्थशास्त्रे षाड्गुण्यस्य विस्तृतं वर्णनं सम्पाद्यते तस्यैव राज्यशासनव्यवस्थायाम् अनिवार्यत्वं च प्रतिपाद्यते। विषयेऽस्मिन् कौटिल्येन निर्दिश्यते यत्- **सन्धि-विग्रह-आसन-यान-संश्रय-द्वैधीभावाः**[१२] षाड्गुण्यमिति।

तत्र षाड्गुण्यवर्णनप्रसंग उच्यते आचार्यकौटिल्येन- **'तत्र पणबन्धः सन्धिः, अपकारो विग्रहः, उपेक्षणमासनम्, अभ्युच्चयो यानं, परार्पणं संश्रयः, सन्धिविग्रहोपादानं द्वैधीभाव इति षड्गुणाः**[१३]**।'** अस्यैवाधररूपतया सप्तप्रकृतिः द्वादशराजमण्डलं च वर्तते। यथोक्तं तत्रैव-**षाड्गुण्यस्य प्रकृतिमण्डलं योनिः**[१४]**। स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि प्रकृतयः**[१५]**।**

तत्र किरातार्जुनीयमहाकाव्यस्य प्रथमे सर्गे वनेचरेण वृत्तान्तस्योद्घाटनक्रमे षाड्गुण्यमिति नयवर्त्म निगूढ-तत्त्वमिति-

**निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः।**
**तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम्।।**[१६]

तत्र सप्तदशमे सर्गे नायकस्य बुद्धिः षाड्गुण्या-दिनयप्रयोगे उपाये च प्रवर्तते-

**आघट्टयामास गतागताभ्यां सावेगमग्राङ्गुलिरस्य तूणौ।**
**विधेयमार्गे मतिरुत्सुकस्य नयप्रयोगाविव गां जिगीषोः।।**[१७]

**४. शक्तित्रयम्**

**प्रभु-उत्साह-मन्त्रभेदात्**[१८] शक्तिस्त्रिविधोच्यते-ऽर्थशास्त्रे। तत्र महाकविना किराते त्रिविधानां शक्तीनां प्राप्तप्रसंगेन विवरणं प्रस्तूयते। तत्र द्वितीये सर्गे बलवता वीरेण क्रोधस्योपशमनं यदि न क्रियते तदा स स्वशक्तिसम्पदो विनाशं करोतीति-

**बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः।**
**क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसम्पदः।।**[१९]

तत्र पंचदशसर्गे किरातार्जुनयोर्युद्धप्रसंगेऽर्जुनस्य युद्धवीरतायाः सन्दर्भे उत्साहशक्तित्वेन रणचातुर्यकौशलं तस्य आद्यन्तयमकेन प्रस्तूयते-

**अवद्यन्पत्रिणः शम्भोः सायकैरवसायकैः।**
**पाण्डवः परिचक्राम शिक्षया रणशिक्षया।।**[२०]

**५. विद्याचतुष्टयम्-**

**आन्वीक्षकी-त्रयी-वार्ता-दण्डनीतिश्चेति**[२१] चतस्रो विद्या अर्थशास्त्रसमुद्भवा इति। **आचार्य-कामन्दकेनापि**[२२] लोकस्थितिहेतूनां विद्यानां महत्त्वं प्रतिपादयता राजनीतौ विद्यानामनिवार्यत्वं स्वीक्रियते। तत्र किराते द्वितीये सर्गे विद्यानां विषये विवेकेन कार्यसिद्धिरित्युच्यते-

**चतसृष्वपि ते विवेकिनी नृप! विद्यासु निरूढिमागता।**
**कथमेत्य मतिर्विपर्ययं करिणी पङ्कमिवावसीदति।।**[२३]

**६. उपायचतुष्टयम्-**

**साम-दाम-भेद-दण्डाश्चेति चत्वार उपायाः**[२४] नीतिशास्त्रवर्णिताः कौटिल्येन प्रतिपादिताः। किराता-र्जुनीये प्रसंगेन उपायानां विधानं भवति तत्र प्रथमे हि सर्गे दुर्योधनस्य नीतिपूर्णशासनस्य कौशलमुच्यते-

**निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम्।**
**प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया।।**[२५]

अस्मिन्नेव क्रमे सामदानवर्णनानन्तरं दण्डप्रकारमाह भारविः-

**वसूनि वांछन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः।**
**गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम्।**[२६]

इत्थमत्रोपायानां प्रसंगाभिमतं सम्प्रति वनेचरमुखेन दुर्योधनस्य भेदकौशलमाह भारविः-

**विधाय रक्षान् परितः परेतरानशङ्किताकारमुपैति शङ्कितः।**
**क्रियाऽपवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः।।**[२७]

**७. अन्यविषयाः-**

इह खलु किरातार्जुनीयमहाकाव्येऽर्थशास्त्रीय-वर्णनपरम्परायां **सिद्धि**रिति प्रसंगो दृग्गोचरीभवति। **'सुखं सिद्धि'** रिति[२८] आचार्यकौटिल्यप्रतिपादितदिशा शक्तिसमवेतैव त्रिविधा सिद्धिरिति प्रभूत्साहमन्त्र-शक्तिसाध्या पुरुषार्थलाभात्मिका प्रभूत्साहमन्त्रसिद्धि-रिति। तत्र सिद्धेर्वर्णनसन्दर्भ एव किरातार्जुनीये भारविः प्रतिपादयति पंचांगस्वरूपा सिद्धिरिति-

**प्रभवः खलु कोशदण्डयोः कृतपंचांगविनिर्णयो नयः।**
**स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते।**[२९]

तत्र कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पद्, देशकालविभागो, विनिपातप्रतीकारः, कार्यसिद्धिश्चेति सिद्धेः पंचावयवाः वर्तन्ते यथाह कामन्दको नीतिसारे-

**सहायाः साधनोपाया विभागो देशकालयोः।**
**विनिपातप्रतीकारः सिद्धिः पंचांगमिष्यते।।**[३०]

तत्र किराते त्रयोदशसर्गे ननु तपोविरोधिनी हिंसेत्याशङ्क्य मनुमतं प्रस्तौति यद् दुष्टनिग्रहात्मिका हिंसापि नाधर्म इति-

**कुरु तात तपांस्यमार्गदायी विजयायेत्यलमन्वाशासन्मुनिर्माम्।**
**बलिनश्च वधादृतेऽस्य शक्यं व्रतसंरक्षणमन्यथा न कर्तुम्।।**[३१]

एवमस्माभिः पदे पदे किरातार्जुनीयमहाकाव्येऽर्थ-शास्त्रीयतत्त्वानां समालोचनं क्रियते।

**सन्दर्भाः-**

१. ऐहोलशिलालेखम्- ३९तमं पद्यम्। २. मल्लिनाथ-घण्टापथटीका। ३. किरातार्जुनीयम्-१/३०। ४. कौटिलीया-र्थशास्त्रम्- १/१५/११/२। ५. कौटिलीयार्थशास्त्रम्- १/१५/११/१। ६. किरातार्जुनीयम्-१/२०। ७. किरातार्जुनीयम्-१४/६। ८. मनुस्मृतिः-दूते सन्धिविपर्ययौ। वपुष्मान्वीतभीवाग्मी दूतो राज्ञः प्रशस्यते। ९. कौटिलीया-र्थशास्त्रम्-१/१०/६/१। १०. किरातार्जुनीयम्-१/१। ११. किरातार्जुनीयम्-१/२। १२. कौटिलीयार्थशास्त्रम्- ६/१/१६/१। १३. कौटिलीयार्थशास्त्रम्-७/१/८८-९९/५। १४. कौटिलीयार्थशास्त्रम्- ७/१/८८-९९/१। १५. कौटिलीयार्थशास्त्रम्- ६/१/९६/१। १६. किरातार्जुनीयम्-२/३। १७. किरातार्जुनीयम्-१७/३८। १८. कौटिलीयार्थ-शास्त्रम्-षष्ठाधिकरणस्य द्वितीयेऽध्याये 'शमव्यायिकं' प्रकरणम्। १९. किरातार्जुनीयम्-२/३७। २०. किरातार्जुनीयम्-१५/३७। २१. कौटिलीयार्थशास्त्रम्- १/१/१/१। २२. कामन्दकीयनीतिसारः- आन्वीक्षकी त्रयी वार्ता दण्डनीतिश्च शाश्वती। विद्याश्चैताश्चतस्रस्तु लोकसं-स्थितिहेतवः।। २३. किरातार्जुनीयम्-२/६। २४. कौटिलीयार्थशास्त्रम्-३/१०/२६/२६। २५. किरातार्जुनीयम्-१/१२। २६. किरातार्जुनीयम्-१/१३। २७. किरातार्जुनीयम्-१/१४। २८. कौटिलीयार्थशास्त्रम्- ६/२/९७/१८। २९. किरातार्जुनीयम्-२/१२। ३०.कामन्दकीयनीतिसारः ३१. किरातार्जुनीयम्-१३/१३।

**वरिष्ठ-अध्यापकः (संस्कृतम्),**
**रा.मा.वि. ठीकरिया, सांगानेर, जयपुरम्**

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# स्वामिलक्ष्मीरामचरितकाव्यम्

आयुर्वेदमार्तण्डविरुदभूषिता विद्वन्मूर्धन्याः श्रीलक्ष्मीरामस्वामिनो जयपुरस्य (अपरा काशीति-प्रख्यातस्य) सुप्रतिष्ठिता भारतविश्रुता आयुर्वेद-मनीषिणोऽभूवन्। विंश्याः शताब्द्याः पूर्वार्धे तेषां यशो देशे भृशं प्रसारमाप यतोहि ते जयपुरस्य सुविख्याते संस्कृतमहाविद्यालये महाराजासंस्कृतकालेजाख्ये आयुर्वेदविभागाध्यक्षा अभूवन्। भारते मूर्धन्येष्वायुर्वेद-मनीषिषु तेषामग्रणीत्वमनेन तथ्येन ज्ञातुं शक्यते यत्तेऽखिलभारतीये षष्ठे वैद्यसम्मेलनाधिवेशने 1915 ई. वर्षे कोलिकातायामाध्यक्ष्यं सप्रशंसमन्वतिष्ठन्। ते हि संस्कृतशिक्षाया अपि पुरोधसोऽभूवन्, संस्कृतविदुषां संघटनविचक्षणा अप्यभूवन्।

स्वामिचरणानां कृतित्वस्याभिनन्दनाय ''संस्कृतरत्नाकर'' प्रभृतिसंस्कृतपत्रिकाभिर्विशेषाङ्काः प्राकाशिषत, तेषां जीवनवृत्तमप्यलेख्यत किन्तु सर्गबद्धे काव्ये तेषां जीवनवृत्तं सपद्येव जयपुरीयेण सुकविना डॉ. रामदेव साहूमहाभागेन षट्सर्गबद्धे सुललितसंस्कृत-काव्ये निबद्धं प्रकाशनं प्रापदिति प्रमोदावहं वृत्तम्। वसन्ततिलकासु, उपजातिषु अन्येषु च वृत्तेषु निबद्धे सर्गषट्के कविवर्येण प्राञ्जलशैल्यां लक्ष्मीरामस्वामिनां छात्रावस्थाया आयुर्वेदपारङ्गतताया:, देशख्याते:, कृतित्वस्य च विवरणं प्रस्तुतमस्ति। कथमायुर्वेदमार्त्तण्डा एते काश्यां, कोलिकातायां वा सादरमादृता:, कथमेषां चिकित्साकौशलं ख्यातिमलभत इत्यादि सर्वं शार्दूल-विक्रीडितादिष्वपि सुबद्धं प्राप्यतेऽत्र।

संस्कृतशिक्षायै श्रीलक्ष्मीरामस्वामिनां बहुमूल्यं योगदानमिदमभूद् यदेतैः ''जयपुरे'' दादूमहाविद्यालय-नाम्ना संस्कृतशिक्षणालयो विंश्याः शताब्द्या द्वितीये दशके प्रारब्धः। एतस्यैव वर्तमानप्राचार्यस्य डॉ. सुरेन्द्रकुमार-शर्मण उत्साहप्रेरितेन प्रकाशसंरम्भेण बहूनि प्रकाशनानि गते कालखण्डे समवातरन्। एवंविधेष्वेव प्रकाशनेष्वेक-तममिदं जीवनचरितकाव्यं स्वामिलक्ष्मीरामशोध-संस्थानेन प्रकाशितमस्ति। काव्यस्य प्रारम्भे देवर्षि-कलानाथशास्त्रिणः पुरोवाक् हिन्द्यां मुद्रिताऽस्ति, परिशिष्टरूपेणान्ते हिन्द्यां लक्ष्मीरामस्वामिनां संक्षिप्तो जीवनपरिचयो डॉ. सुरेन्द्रकुमारशर्मलिखितोऽपि मुद्रितः।

संस्कृतस्य आयुर्वेदस्य च चिरस्मरणीयायै सेवायै सर्वात्मना समर्पितस्याजरामरस्य मनीषिमूर्धन्यस्यास्य जीवनवृत्तं काव्यबद्धं कृतवतां प्रकाशितवतां च सर्वेषां संस्कृतसेविनां वर्धापनं साधुवादैः कुर्मः।

**श्रीलक्ष्मीरामवैभवम्:** कविः डॉ. रामदेव साहू, प्रका. स्वामी लक्ष्मीरामशोधसंस्थान, स्वामी लक्ष्मीरामजी का बाग, मोतीडूंगरी रोड, जयपुर. पृ.सं. 10 मू. 150/-.

## शङ्कराचार्यकृतिः

वेदान्तविद्यानिधेर्भगवत्पादस्यादिशङ्कराचार्यस्य सुमहत् कृतिजातं सुप्रथितं संस्कृते यत्र भाष्यग्रन्था:, दर्शनविमर्शग्रन्था:, स्तोत्राणि च शताधिकसंख्यायां प्रकाशितान्येव। सद्य एव जयपुरीये आयुर्वेदमार्तण्ड-स्वमिश्रीलक्ष्मीराममहोदयानां संग्रहे ''परमार्थसार'' शीर्षकः शङ्कराचार्यविरचितो दर्शनविमर्शग्रन्थ उपलब्धो ऽभूद्यस्मिन् आर्याच्छन्दःसु वेदान्तदर्शनस्य परम-तत्त्वपरिचायकानि 88 पद्यानि सन्ति। सोऽयं ग्रन्थ आदिशङ्कराचार्यस्य स्यात्, परवर्तिनः कस्यचन शङ्कराचार्यवर्यस्य वा स्यात्। किन्तु महत्त्वपूर्णोऽयं सिध्येदिति विचार्य महाविद्यालयस्य प्रधानाचार्येण डॉ. सुरेन्द्रकुमारशर्मणा प्रेरितया महाविद्यालयीयदर्शनवि-भागाध्यक्षया श्रीमत्या अंजनाशर्मवर्यया 88 पद्यानामेषां हिन्द्याम् (गद्ये) अनुवादः प्रस्तुतः, कविवर्यस्य डॉ. रामदेवसाहूमहोदयस्य हिन्द्यां निबद्धया भूमिकया सह चायं महाविद्यालयेनाऽनेन प्रकाशित इति प्रमोदास्पदम्। अस्मिन् हि आत्मनः, ब्रह्मणः, कर्मणां, मायायाः, जगतः अन्येषां च विचार्यविषयाणां संक्षिप्य विवरणमुपलभ्यते। स्वागतमस्य कुर्महे।

**अद्यशंकराचार्यविरचितः परमार्थसारः** संपादिका श्रीमती अंजनाशर्मा प्रका. शोध एवं प्रकाशकविभाग, श्रीदादूसंस्कृतमहाविद्यालय, मोतीडूंगरी जयपुर पृ.सं. 30 मूल्य 50/-.

## कथासरित् नूतनस्तरङ्गः

कोलिकाता-प्रयागयोः समेकितेन साहित्यसेवा-सङ्कल्पेन प्राकट्यमुपयान्ती षाण्मासिकी संस्कृतकथा-पत्रिका ''कथासरित्'' 22 तमं तरङ्गं प्रवाहितवतीति परमः प्रमोदः। अस्मिंस्तरङ्गेऽपि यथापूर्वं कथानां विधावैविध्यं स्पष्टीभवति, कथाः, लघुकथाः, टुप्कथाः, स्मृतिकथाः, व्यंग्यकथाः, बालकथाः, बालोपन्यासः इत्यादयो विधा अत्र दृश्यन्ते, अनूदितकथानामपि विपुलः प्रवाहः, ईश्वरचन्द्रविद्यासागरस्य बङ्गीयकथानां त्रयं, रवीन्द्रनाथठाकुरस्यैका कथा चाऽनूदिता प्रकाशिताऽस्ति। गतेऽङ्के एशियादेशानामन्येषां कथा अनूदिता आसन्। प्रारम्भे जयपुरीयस्य जगद्गुरुरामानन्दाचार्य-संस्कृत-विश्वविद्यालयस्य साहित्यविभागाध्यक्षाणां डॉ. ताराशङ्करशर्मपाण्डेयानां साक्षात्कारोऽपि पठनीयोऽस्ति, सम्पादकीये आमुखलेखे सम्पादकत्रयेण गते कालखण्डे संस्कृतजगतः प्रमुखघटनानां यथा सिंहावलोकनं प्रसङ्गवशात् प्रस्तुतं तद् दृष्ट्वा समजनि सुमहान् सन्तोषः। कथासाहित्यपत्रिकाया विषयवस्तु कथान्तरं, किन्तु सामान्यतः संस्कृतपत्रकारतायाः प्रथममिदं कार्यमपेक्ष्यते पाठकैः यत्तया प्रत्यङ्कं संस्कृतजगति घटितानां प्रमुखघटनानां संक्षिप्य विहगावलोकनं प्रस्तूयेत येन पाठका नूतनप्रवृत्तीनां परिचयं प्राप्नुयुः। एतस्यैवाङ्गमस्ति पुस्तकसमीक्षास्तम्भः।

स्मरामि प्रसङ्गेऽस्मिन् भारतीयसाहित्य-अकादम्या प्रारब्धायाः प्रकृष्टसंस्कृतपत्रिकायाः ''संस्कृत-प्रतिभायाः'' प्रथमं सम्पादकवर्यं डॉ. वेङ्कटराघवन् महाभागं यो बहुधा मह्यं सूचयति स्म यत्पत्रिकायाः प्रत्येकस्मिन्नङ्के तस्य प्रयत्नो भवति यत्तस्मिन् कालखण्डे यदपि यावच्च साहित्यं संस्कृते प्रकाशमाप्तं तस्याति-संक्षिप्तः परिचयः पाठकेभ्यः प्रदीयेत, अतः स सुविचारितेन संक्षिप्तेन समीक्षणकौशलेन विपुलसंख्य-कानां संस्कृतप्रकाशनानां समीक्षणं प्रत्यङ्कं प्रस्तौति स्म।

कथासरितोऽस्मिन्नङ्केऽपि यथोपलब्धप्रकाशनानां समीक्षणं दृश्यत एव, भारते प्रकाशमुपलभमानानां संस्कृतपत्रिकाणां सूची या पर्यन्ते मुद्र्यते साऽपि सुतरामुपकारिणी पाठकानाम्। संस्कृतपत्रकारा नूनमभिरोचयेयुरिममपि प्रयासं यत् संस्कृतपत्रिकासु कुत्रचन प्रत्येङ्कं तस्मिन् कालखण्डे सञ्जातानां संस्कृतजगतो गतिविधीनां संक्षिप्तं विहगावलोकनं समुपलभ्यते। (यथा कति विद्वांसो दिवमारूढाः, कति सम्मानिताः, कति पत्रिका जनिमलभन्त, कति सम्मेलनानि, समध्यविशन् का वा समुल्लेखनीया घटना पाठकेभ्यः सूचनीया मन्यते इत्यादि)।

कथासरितोऽस्य तरङ्गस्य सम्पादकीयं सूचयति यत् कति संस्कृतचलचित्राणि देशे समुपातिष्ठन्त। स्वागतार्हा सेयं सूचना। आदिशङ्कराचार्याख्यं चलचित्रं (ऐयरमहाशयेन प्रस्तुतं) लोकप्रियमभूत्, बहून् सम्मानानलभतेति स्मरेयुः संस्कृतसेविनः। अपरं संस्कृतचलचित्रमासीज्जयपुरीयेण डॉ. उमेशशास्त्रिणा प्रस्तुतं ''मृच्छकटिकम्'' यत्र बहवो नूतनाः प्रयोगाः पाठकानां मनांसि प्रमोदितवन्तः। तस्य सूचना नास्ति सम्पादकीयेऽस्मिन्निति कथान्तरम्। नूतनस्य संस्कृत-चलचित्रस्य ''प्रियमानसम्'' इत्यस्य सूचनाऽत्रास्तीति स्वागतार्हम्। कतिपयलघुचलचित्राण्याप्यत्र सूचितानि। ''इष्टि'' नामकं चलचित्रं केरलीयेन निर्मात्रा निर्भीयमाणमस्तीति साम्प्रतमस्माभिः सूचना प्राप्ता। प्रसङ्गवशात्सर्वमिदमत्र संस्कृतपत्रकारताया विषय-फलकमवलम्ब्य व्यलेखीति मर्षयिष्यन्ति पाठका इत्याशास्यते।

**कथाभारती ( षाण्मासिकी )** सम्पादकौ बनमाली विश्वालः, नारायणदाशः सहसम्पाकः राकेशदाशः, प्रकाः कथाभारती, 57, वसन्तविहार, झूंसी इलाहाबाद, तरङ्ग 22 पृ. 206, मू. 50/-, वार्षिकम् 100/-, आजीवनम् 2500/-.

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-

द्वाविंशः प्रसङ्गः

# संघस्यैव चिन्तनम्

❑ वेणीमाधव गो. धर्माधिकारी

नागपुरतः श्रीमतीवीणाहरदासमहोदया वर्णयति- श्रीमतां बाबामहोदयानां सम्बन्धेऽस्माकं मनस्यात्मी-यतायाः निर्माणं तेषां भगिनी (ताई) तस्याभ्राता चैतयोर्वशादेव जातम्। 1939 वर्षे वणीस्थानेऽस्माकं महाराष्ट्रीयकन्या-शालायां श्रीमतां बाबासाहेब आप्टेमहोदयानां भगिनी ''मथुराबाई'' मुख्याध्यापिका आसीत्। सा शरीरेण किंचित्स्थूला आसीत्। एकस्मिन् नेत्रे च मौक्तिकबिन्दु-कमप्यासीत्। तस्याः पाठनशैली बहुरमणीया आसीत्। अथापि यदाहं चतुर्थकक्षायां प्राप्ता, तस्मिन्नेव वर्षे सा नेत्रस्य रोगमिषात् सेवातो निस्सारिता, तत्स्थाने चैका यिशुधर्मानुयायिनी महिला नियुक्ता। मथुराबाई महोदयायाः शालातो निस्सारणं मह्यमपि तस्मिन् लघुवयस्यपि न रोचते स्म। एतेन दुःखेन नूतनाध्यापिकाया व्यवहारेण वा अप्रीत्या लघुवयस्यपि मया तां शालां त्यक्तुं हठः कृतः।

एतां घटनां यावन्मथुराबाई महोदयानां व्यक्तिगत-जीवनविषये नासीत्परिचयः। इदमपि च न ज्ञातमासीत् यद् बाबामहोदयः तस्या भ्रातास्ति। परं शाला परिवर्त्तनार्थ-मावश्यकं प्रमाणपत्रं प्राप्तुं मात्रा सहाहं मथुराबाई-महोदयाया गृहे गता। श्रीमती मथुराबाई महोदया मात्रा सह वणीस्थानस्य पृष्ठे एकस्मिन् कक्षे निवसतिस्म। तत्रैव वार्ताप्रसङ्गेन ज्ञातं पश्चात्मात्रावबोधिता संघस्याधिकारिणो बाबामहोदयाः अस्याः भ्रातरो वर्त्तन्ते। तस्मादेव दिनाद् बाबामहोदयानां विषये मम चेतस्यधिकाधिकात्मीयता वर्द्धमानासीत्।

शालायाः सेवामुक्त्यनन्तरं मथुराबाई महोदया भगवत्कीर्तने संलग्ना। कीर्त्तनानां कार्यक्रमार्थं तस्यै भिन्न-भिन्नेभ्यो ग्रामेभ्यो निमन्त्रणमायातिस्म। सा च तत्र गच्छति स्म। परमधुना तस्या माता अतिवृद्धा अभवदतस्तामेकाकिनीं त्यक्त्वा गमनमपि तत्कृते असंभवमेवाभूत्। यथाकथंचिद् वृत्त्या जीवनं प्रचलतिस्म। अस्यां स्थितौ बाबामहोदयः केवलमेकवारं वणीस्थानआगतः न पुनः कदापि।

तत अनेकवर्षानन्तरं यदा मे विवाहः संपन्नः अहं च नागपुरे समागता तदा आप्टे महोदयेन मिलनं प्रारब्धम्। मम पतिः (स्व. महामहोपाध्यायः बालशास्त्री हरदासः) आप्टेमहोदयेन परिचितः। अतः बाबामहोदयः गृहे समागच्छतिस्म। एकदा मया साहसपूर्वकं प्रश्नः कृतः बाबामहोदय! अद्यत्वे ताई महोदया कुत्र निवसति। सविस्मयं बाबामहोदयेन कथितम् हो ! त्वं मम भगिनीं जानासि? तदा मया शालासम्बन्धिनी कथा संक्षेपेण कथिता। तैश्च तूष्णीमेव श्रुता तैः स्वमुखेन न किमपि कथितम्। मे ज्ञातुमिच्छासीदतो मे जिज्ञासा पूर्णा दृष्टिस्तेषु केन्द्रिता आसीत्।

तदा तैः केवलमिदं कथितम्-सत्यं कथयानि मम-भगिनीविषये यावद्ज्ञानं तेऽस्ति तावदपि मे नास्ति। यदैवाहं संघकार्ये संलग्नः तदाप्रभृतीदमपि विस्मृतं मे भगिनी माता चास्ति। एतादृशाय तेषां समर्पित जीवनाय शतशः प्रणामः।

---

प्रेरकप्रसङ्गशतकम्

चतुश्चत्वारिंशः प्रसङ्गः

# ज्ञानं भारः क्रियां विना

❑ मा. श्रीमती आराधना धर्माधिकारी

एकः संतजनः एकस्मिन्नेव जीर्णधौतवस्त्रे नगरेषु ग्रामेषु च भ्रमतिस्म। एकदा तस्मै एको धनिकः स्वर्ण-पात्रमेकं प्रदत्तवान्। रात्रौ स सन्तजनः एकस्मिन् भग्नगेहे (खण्डहर) विश्रामं करोतिस्म। तस्यां रात्रौ यदा स शयनसज्जां करोतिस्म तदैव तेनावलोकितम् एको जनः निलीय तं पश्यति।

सन्तेनावबुद्धम्, तं चाहूय कथितम्-इदं स्वर्णपात्रं गृहाण इदमेव वाञ्छसि त्वम् ? सः त्वरितमेवागत्य पात्रं गृहीत्वा पलायितः। सन्तो निश्चितः सुष्वाप। अग्रिमे दिने प्रातरेव यदा तेन नेत्रे उद्घाटिते स एव जनः पात्रमादाय स्थितो दृष्टिपथमायातः। सन्तः आगमनहेतुं पृष्टवान्, तदा स अवदत्-मामपि तस्याः सम्पदायाः मार्गं प्रदर्शयतु येन एतादृशपात्राणि स्व तो दूरीकर्त्तुं किञ्चिदपि विलम्बं न करोति भवान्।

# भारतराष्ट्रे षोडशसंस्काराणां परम्परा

❑ बुद्धिप्रकाशजाँगिड़, आचार्यद्वितीयवर्षम्

संस्कारशब्दः सम् उपसर्गपूर्वक 'कृञ्' धातुना घञ् प्रत्ययपूर्वकं निष्पन्नः अस्ति। सम+कृञ्+घञ् इति संस्कारशब्दस्य व्युत्पत्तिः। संस्कारशब्दस्य प्रयोगः बहुधा भवति। मीमांसादर्शने अस्य संस्कारशब्दस्य अर्थः यज्ञाङ्गभूत पुरोडाशादिशुद्ध्यर्थं प्रोक्षणीवक्षणादिना सम्पन्नः भवति। अद्वैतवेदान्तमतानुसारेण शारीरिक-क्रियाणां मिथ्याक्षेपः संस्कारः इति। अभिव्यक्तिहेतुना आत्मव्यञ्जकशक्तिः संस्कारः कथ्यते इति नैय्यायिकाः। मानवजीवने संस्काराः महत्त्वपूर्णाः सन्ति। संस्कारैः मनुष्यत्वं, मानवता, व्यक्तित्वविकासश्च भवति। विभिन्नेषु ग्रन्थेषु संस्काराणां संख्या भिन्ना-भिन्ना दर्शिता वर्तते। जन्मना मानवः अपूर्णः भवति। संस्कारैः तत्र पूर्णता आयाति।

भारतीयग्रन्थपरम्परायां प्रायः षोडशसंस्काराः करणीयाः इति भगवान् बादरायणः सूचयति, ते च इत्थं सन्ति-

**१. गर्भाधानसंस्कारः**

सृष्ट्यां मानवः सर्वोत्कृष्टो मन्यते। तस्य जीवनस्य उद्देश्यम् आत्मसाक्षात्कारो वर्तते। विधिपूर्वकं संस्कृतो मानवो दिव्यज्ञानमर्जयित्वा आत्मसाक्षात्कारं कर्तुं प्रभवति। मानवस्य सम्पूर्णजीवनं संस्काराणां क्षेत्रं वर्तते। संस्काराणां प्रमुखं लक्ष्यं शरीरस्य शुद्धिः पवित्रता चास्ति। एते संस्काराः वस्तुतः गर्भस्याधानादेव प्रारभन्ते।

अधिकांशगृह्यसूत्राणि गर्भाधानादेव संस्काराणां प्रारम्भं निर्दिशन्ति। प्रजननमपि मानवजीवनस्य अङ्गभूतम्। धर्मशास्त्रानुसारम् अत्र काऽप्यशुचिता नास्ति। अस्मिन् विषये मनुराह-

**वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्।**
**कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च।।**

अस्यायमर्थो यद् वेदमूलत्वात् वैदिकैः पुण्यैः शुभैः मन्त्रप्रयोगादिभिः कर्मभिः द्विजातीनां गर्भाधानादि-शरीरसंस्कारः कर्तव्यः। यतोहि एष शरीरसंस्कारो न केवलम् इहलोके परलोके चापि पुनाति। एवम् उक्तप्रकारेण गर्भाधानादिभिः संस्कारकर्मभिः पापं शमं याति। गर्भाधानं परिभाषमाणो जैमिनिराह गर्भः सन्धार्यते येन कर्मणा तद् गर्भाधानमित्यनुगतार्थं कर्मनामधेयम्।

शौनकोऽपि प्रत्यपादयत् यत् यस्मिन् कर्मणि पुरुषेण निषिक्तो गर्भः स्त्रियां धार्यते तत् गर्भालम्भनं गर्भाधानं इत्युच्यते-

**निषिक्तो यत्प्रयोगेण गर्भः सन्धार्यते स्त्रिया।**
**तद् गर्भालम्भनं नाम कर्म प्रोक्तं मनीषिभिः।।**

मनुयाज्ञवल्क्यादयः आचार्याः इदमेव कर्म ''निषेक'' इत्यभ्यदधुः।

**२. पुंसवनसंस्कारः**

गर्भधारणानन्तरं गर्भस्थशिशोः पुंसत्व-सम्पादनहेतोः पुंसवननामकः संस्कारः भवति। अत्र विभिन्नदेवानां प्रार्थना भवति। यया प्रार्थनया गर्भस्थशिशुः पुष्टो भूत्वा पुत्ररूपेण प्राप्तो भवेत्। अस्मिन् अवसरे आयुर्वैदिकौष-धीनां सेवनं, भगवतः विष्णोः पूजनं च कर्तव्यम्। येन कर्मणा पुमान् सूयते तत् पुंसवनम्। गर्भाधानस्य द्वितीये तृतीये वा मासे पुष्यनक्षत्रयुक्तायां तिथौ पुंसवनकर्म क्रियते। पुत्रजनननिमित्तं संस्कारः क्रियते। होमः औषधिसेवनञ्च परिपाल्यते।

**३. सीमन्तोन्नयनसंस्कारः**

गृह्यसूत्रानुसारेण गर्भधारणानन्तरं चतुर्थे पञ्चमे वा मासे सीमन्तोन्नयनसंस्कारः भवति। अत्रावसरे पतिपत्न्योः केशानां प्रसाधनं वा संवर्धनं च करणीयम्। तयोः कृते उत्सवरूपोऽयं संस्कारः। अत्र संस्कारः, नृत्यं गानं, वादनम् इत्यादि भवति। पत्न्याः मनोरञ्जनार्थं सोमस्य स्तुतिः भवति। यदा चन्द्रः पुरुषवाचकनक्षत्रेण युक्तः

भवति तदा एव एषः संस्कारः भवति। सीमन्तम् उन्नीयते यस्मिन् कर्मणि तत् सीमन्तोन्नयनम्। स्मृतिग्रन्थानुसारेण षष्ठे अष्टमे वा मासे संस्कारोऽयमनुष्ठीयते। त्रिभिः दर्भपिञ्जुलैः गर्भिण्याः सीमन्तं (केशम्) उर्ध्वं विनमयति स्वामी। गर्भरक्षणमस्य प्रयोजनम्। केशस्य विभजनद्वारा जातशिशोः यशः त्रिलोकं व्याप्नुयात् इति भावः।

**४. जातकर्मसंस्कारः**

जातकर्मसंस्कारः नवजातशिशोः संवर्धनार्थं तथा च तस्य परिपोषणार्थं भवति। एतस्मिन् नाभिवर्धनात्पूर्वं पञ्च ब्राह्मणैः वैश्वानराग्नेः स्तुतिः भवति। तथा च आहुतिः अपि देया भवति। येन शिशोर्दीर्घायुष्यम् एवम् अभ्युदयश्च भवति। गर्भकोशात् शिशोर्निगमने सति जातकर्म विधीयते। पुत्रमुखदर्शनेन पिता नाभिवर्धनात् प्राक् शीतोदकेन सतैलस्नानं विधाय उत्तराभिखो भूत्वा यथाविधि जातकर्म कुर्यात्। जातकर्मणि पितॄनुद्दिश्य नान्दीमुखश्राद्धादिकर्माणि क्रियन्ते। एतत्सर्वं शौचानन्तरमेव कर्त्तव्यम्।

**५. नामकरणसंस्कारः**

अयं संस्कारः शिशोः जन्मानन्तरदशैकादश-दिनानन्तरं भवति। गोपनीयं नाम तु जातकर्मसंस्कारे एव भवति। उच्चारणार्हं नाम एतस्मिन् दिने भवति। शुभमुहूर्ते नक्षत्रे च मधुरध्वनियुक्तं नाम चतुराक्षरैः वा द्वि अक्षरात्मकं भवति। नाम्नः करणं नामकरणम्। शिशोः जन्मनः दशमे एकादशे वा दिवसे पुण्यावसरे पिता आचम्य 'अस्य पुत्रस्य नामकरणं करिष्ये' इति संकल्प्य पुण्याहं कथयित्वा नान्दीश्राद्धं च विधाय ब्राह्मणान् भोजयित्वा कुमारस्य नाम दद्यात्। ब्राह्मणशिशोः जन्मतः दशमदिवसे, क्षत्रियाणां त्रयोदशे षोडशे वा दिवसे, वैश्यानां षोडशे विंशतितमे वा दिवसे, शूद्राणां द्वाविंशे मासान्ते वा नामकरणसंस्कारः करणीयः।

**६. कर्णवेधसंस्कारः**

कर्णवेधं प्रशंसन्ति पुष्ट्यायुः श्री विवृद्धये इति गर्गस्य उक्त्या अस्य संस्कारस्य प्रशंसा ज्ञायते। अस्मिन् संस्कारे प्रथमं बालकस्य दक्षिणे कर्णे सूर्यकिरणप्रवेशयोग्यं छिद्रं तदनु वामकर्णे क्रियते। संस्कारेण अनेन अन्त्रवृद्धिर्न भवति इत स्मृतिकाराणां मतं –

**शङ्कोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीम्।**
**व्यत्यासाद्वा शिरां विध्येदन्त्रवृद्धिनिवृत्तये।।**

कर्णवेधसंस्कारात् बालकेषु नपुंसकत्वं, बालिकासु च वन्ध्यात्वं न भवति इति स्मृतिसङ्ग्रहबोधनम्।

**७. निष्क्रमणसंस्कारः**

शिशोः गृहात् प्रथमबहिर्निर्गमनं निष्क्रमणमित्युच्यते। चतुर्थमासे शुभे दिने संस्कारोऽयं करणीय इति मनुनोक्तम्। शिशोः मानसिक्याभिवृद्ध्यर्थं, बाह्यजगतः ज्ञाननिमित्तं, श्रीवृद्ध्यर्थं संस्कारोऽयं विधीयते।

**८. अन्नप्राशनसंस्कारः**

अन्नं प्राश्यते येन कर्मणा तदन्नप्राशनम्। षष्ठे मासे अथवा कुलधर्मत्वेन माङ्गल्यकालविशेषे मासेऽन्नप्राशनं करणीयमिति मनुना प्रोक्तम्। 'षष्ठे मासेऽन्नप्राशनम्' इति पाराशरगृह्यसूत्रम्। **'घृतोदनं तेजस्कामः दधिमधु घृतमिश्रमन्नं प्राशयेत्'** इति आश्वलायनगृह्यसूत्रम्। सामान्यतः दधिमधुघृतमिश्रितमन्नं शिशवेऽन्नप्राशनाय प्रदीयते। काठकगृह्यसूत्रानुसारेण शिशोः दन्तजनना-नन्तरमन्नप्राशनं विधेयम्। तस्मिन् दिवसे सिद्धं सुमिष्टं चान्नमिष्टदेवेभ्यः उत्सर्गीकृत्य पिता पुत्रं मन्त्रपाठपूर्वकं भोजयेत्।

**९. चूडाकर्मसंस्कारः**

चूडानां केशपाशानां संस्कारो येन कर्मणा क्रियते तत् चूडाकर्मेति कथ्यते। प्रथमे तृतीये वा संवत्सरे अथवा कुलधर्मानुसारेण संस्कारोऽयं करणीयः। प्रवरसंख्यानु-सारेण चूडाकरणसंस्कारः कल्पितः। शिखा एकाधिका भवितुमर्हति। वशिष्ठगोत्रियाः शिरोमध्यभागे एकां शिखां धारयन्ति। अत्रिकाश्यपगोत्रियाः पञ्चशिखाः धरन्ति। भृगुवंशीयाः सर्वमुण्डिताः भवन्ति।

**१०. उपनयनसंस्कारः**

बालसंस्काराणाम् उपनयनाख्यः संस्कारः एव

सर्वप्रधानः। वेदाध्ययनाय गुरोः शिष्यस्य समीपे गमनम् उपनयनम् इति उच्यते। उपनयन शब्दोऽयम् उपसर्ग-पूर्वक नी धातोः ल्युट् प्रत्यययोगेन निष्पद्यते। उप=समीपं (वेदपठनाय गुरोः समीपं) नयनमुपनयनम् इति। यदा पिता वेदम् अध्यापयितुम् असमर्थो भवति तदा स्वयं स्वपुत्रम् आचार्यस्य समीपं नीत्वा तस्य उपनयनार्थं प्रार्थयेत्। आचार्यः तम् उपनीय शिष्यत्वेन अङ्गीकृत्य तम् अध्यापयेत्। महर्षिगौतममतानुसारेण प्रथमतः अष्टवर्ष-वयस्कं माणवकम् उपनयनसंस्कारेण संस्कुर्यात्। उपनयनं हि माणवकसंस्कारः।

**११. वेदारम्भसंस्कारः**

उपनयनसंस्कारस्य अनन्तरं गुरुः शिष्यं वेदान् शिक्षयेत्। तदारम्भप्रधानः संस्कार एव अयम्।

**उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम्।**
**वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्।।**

(याज्ञवल्क्यस्मृतिः)

वेदारम्भः प्रथमं निजशाखायाः एव स्यात्। निजशाखां साङ्गोपाङ्गम् अधीत्य ततः शाखान्तराध्ययनक्रमः विहितः।

**१२. केशान्तसंस्कारः**

षोडशे वर्षे केशान्तसंस्कारः सम्पादनीयः। संस्कारोऽयं ब्रह्मचर्यस्य समाप्तिमेव सूचयति। अस्मिन् संस्कारे ब्रह्मचारी केशानां श्मश्रूणां च क्षौरं करोति। अवसरेऽस्मिन् आचार्याय गोदानं क्रियते। नापितायापि उपहारः प्रदीयते।

**१३. समावर्तनसंस्कारः**

द्वादशवर्षाणि वेदग्रहणान्तं वा गुरुकुले ब्रह्मचर्यम् आचरित्वा ततः प्रतिनिवृत्तेः काले समावर्तनाख्यः संस्कारः अनुष्ठेयः। तत्र प्रधानभूतं कर्म स्नानम्। तच्च तस्य ब्रह्मचर्यप्रक्षालनोद्देशेन क्रियते। तेन सः स्नातकाख्यो भवति। अत आश्रमाद् गृहगमनं समावर्तनम् इति उच्यते। संस्कारेऽस्मिन् गुरोः उपदेशः भवति। एष उपदेशो ब्रह्मचारिणः जीवनयात्रां सुखदां सरलां च कर्तुं सारगर्भितो भवति। उपदेशवाक्यानि श्रद्धा-विश्वास-प्रेम-भक्ति-ज्ञान-वैराग्यादीनि ऐहिकपारलौकिककल्याणानि वर्षन्तीव भान्ति।

**१४. विवाहसंस्कारः**

गृहस्थाश्रमं प्रविविक्षता 'विवाहसंस्कारः' अनुष्ठीयते। अयं संस्कारः स्त्रीणामपि भवति। गृहस्थाश्रमपरिपालनाय गृहिण्याः अपेक्षा भवति। अतः स्त्रीपुरुषयोः सौन्दर्यं, पौरुषं, नारीत्वं, चरित्रं, कुलं चेति बाह्याभ्यन्तरदृष्ट्या उद्वाहः परिणयनं, विवाहः इति वा अभिधीयते उक्तं च- **नारीणां परमा गतिः पतिः। भर्तृमार्गानुसरणं स्त्रीणां हि परमं व्रतम्। न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते। तस्याः पुत्रं प्राप्य पुरुषः पूर्णोऽभवत्। पुत्रलाभेन पितृणाम् ऋणाद् मुक्तिः।** इत्यादिभिः सुभाषितैः अस्य संस्कारस्य महत्त्वम् अवगम्यते।

**विवाहाग्निपरिग्रहसंस्कारः**

आश्रमेषु गृहस्थाश्रमः विशिष्टः अस्ति। अस्मिन् प्रवेशार्हता विवाहसंस्कारेण भवति। तस्मिंश्च संस्कारे अग्निः प्रधानदेवता। तस्य परिग्रहः एव अस्मिन् संस्कारे विशिष्टं कर्म। धर्मशास्त्रानुगुणम् आह्निकाचारयोः महत्त्व-पूर्णं स्थानम् आस्ते। गृहस्थानां प्रमुखं कर्तव्यम् आयाति 'अग्निपरिग्रहः'। अग्निः नित्यकर्म भवति गृहस्थस्य। अग्नौ समिधानिक्षेपणं वास्तविकः यज्ञः अस्ति।

**गृहस्थस्तु षडग्निः स्यात्पञ्चाग्निश्चतुरग्निकः।**
**स्याद् द्वित्र्यग्निरथैकाग्निः नाग्निहीनः कथञ्चन।।**

**१६. अन्त्येष्टिसंस्कारः**

अयं संस्कारः मानवजीवनस्यान्तिमसंस्कारः, येन संस्कारेण सह तस्य जीवनं समाप्यते। अन्त्येष्टेः कारणेन मनुष्यः परलोकं प्राप्नोति। मृत्युपरवर्तिजीवनस्य सरलीकरणाय अयं संस्कारः अनुष्ठीयते।

**अध्यापक**, केन्द्रीय विद्यालय

नारी-स्तम्भः

# ब्रह्मनादमयी-लतामंगेशकरः

❑ डॉ. राजेश्वरीभट्ट

चतुःसप्ततिवर्षेभ्यो निखिलं विश्वम् आत्मनो मधुरगानस्वरेण सम्मोहयन्ती राष्ट्रीयसर्वोच्चेन, महत्-साधनासाध्येन भारतरत्न इति नागरिकसम्मानेन सम्मानिता, कोटिकोटिकण्ठैः प्रशंसिता सुश्रीलता-मंगेशकर महाभागा संगीत जगतोऽनन्या स्वरसाधिका विद्यते। लोके सम्भवतः कोऽपि न स्यात् यः संगीत-साम्राज्ञ्याः लताया मधुर-स्वरेणाऽभिभूतो नाऽभवत्। अपूर्वा पार्श्वगायिका लता, 27 दिसम्बर 1929 तमे ख्रिस्ताब्दे मध्यप्रदेशे इंदौरनगरे पं. दीनानाथ-मंगेशकरस्य गृहे पुत्रीरूपेण जनिमलभत। उत्कृष्ट-संगीत-विशारदाया लतायाः पिता कुशलः संगीत-प्रशिक्षकः कुशलः अभिनेता चासीत्। बालिका लता परिवारे रससिक्ते संगीत परिवेशे श्वसन्ती सहजेनैव संगीतविद्यां प्रति प्रवृत्ता जाता, संगीतप्रशिक्षकस्य पितुः सन्निधौ सततं स्वरसाधनायां सक्तायाः पुत्र्या अलौकिकं स्वरमाधुर्यं श्रुत्वा पिता, दीनानाथोऽनेकशः रोमाञ्चितो जातः। बाल्यावस्थायां लता गानविद्यया सह अभिनय-कलायामपि पदमारोपयत्। सप्तवर्षीया बालिका लता मराठीभाषया विरचितस्य 'सौभद्रम्' इति नाटकस्य मञ्चाद् महर्षेः नारदस्य अभिनयं कृतवती। एतदतिरिक्तं बड़ी माँ, जीवनयात्रा, छत्रपतिशिवाजी इत्यादिषु नाटकेष्वपि लता अभिनयं प्रदर्शितवती। किन्तु अनन्तरं संगीतप्रियाया लताया मनः संगीतसाधनायामेवारमत। 1942 तमे वर्षे यदा लता त्रयोदशवर्षीयाऽभवत् तदा बालिकालतायाः पिता पं. दीनानाथ मंगेशकरः परिवारे पञ्चापत्यानि पत्नीञ्च विहाय पञ्चत्वं प्रयातः। अशरणा लता आत्मनो भ्रातृभगिनीषु ज्येष्ठाऽऽसीत्। एवं सति आर्थिकसंकटैर्गस्ता विवशा लता, अल्पवयस्येव पितुः मित्रस्य मार्गदर्शने चित्रपटस्य कृते गीतानि प्रस्तुतवती। गीतमिदं जनैर्मुक्तकंठेन प्रशसितम्। संगीतक्षेत्रे नैपुण्यमधिक-तरमधिगन्तुं संगीतप्रिया लता सम्प्रति अमानअलीखाँ, उस्ताद अमानत खाँ, पं. तुलसीदास सदृशानां संगीतमार्तण्डानां सन्निधौ संगीतसाधनां कुर्वन्ती लोके महतीं प्रतिष्ठां प्राप्तवती। अनन्तरं संगीतज्ञाया लताया निखिलः परिवारः संगीत विद्यामेव आत्मनः सिद्धिक्षेत्रममन्यत। सप्त-स्वरसाधिका लता राष्ट्रस्य बहुश्रुतानां भावप्रवणानां प्रमुखसंगीत-निर्देशकानां निर्देशने सहैव मोहम्मदरफी, किशोरकुमार, मुकेश सदृशैः लोकप्रियगायकैः सह अनेकानि गीतान्यगायत। प्रायः दृश्यते यत् क्षेत्रीय भाषासु गीतानां प्रस्तुतिः सर्वेषां गायकानां कृते सरला नास्ति। किन्तु बहुमुखीप्रतिभासम्पन्ना कोकिल-कण्ठा लता सर्वासु भाषासु सहजनिर्बाधरूपेण असंख्यानि गीतानि प्रस्तुतवती। राष्ट्रस्य सर्वाणि पर्वाण्याधारीकृत्य लता महाभागा सरसानि भावपूर्णानि गीतानि प्रस्तूय जनरञ्जनं कृतवती। संगीतक्षेत्रे शास्त्रीय संगीत, सुगमसंगीत, ठुमरी, ध्रुपद, गजल, लोकसंगीतादिषु, सर्वासु संगीत-विधासु संगीतविशारदायाः पूर्णाधिकारो वर्तते। संगीत-क्षेत्रे लब्धप्रतिष्ठानां, कुंदनलाल सहगल, बड़े गुलामअली, भीमसेन जोशी, सलामत नजाकत सदृशाः संगीतज्ञाः युगपुरुषाः लताया आदर्शभूताः सन्ति। स्वरसाम्राज्ञी लता विंश्वस्य विंशतिषु भाषांसु पञ्च-सहगीतानि प्रस्तुतवती। 1962 तमे वर्षे भारतचीन-देशयोर्मध्ये जाते युद्धे दिवंगतानां देशभक्तसैनिकानां सम्माने आयोजिते श्रद्धाञ्जलिमहोत्सवे स्वरसाधिकायाः गीतं श्रुत्त्वा तत्रोपस्थिजनसमूहेन सहैव प्रधानमन्त्रि-जवाहरलालनेहरू महोदयस्य नेत्रे अश्रुपूरिते जाते। उत्कृष्ट गायिका लता राष्ट्रभक्तिपरायणा, संवेदनशीला, आजीवनं परिवाराय समर्पिता आदर्शमहिला वर्तते। आत्मन उत्कृष्ट उपलब्धीनां कृते स्वरसाम्राज्ञी लता नैकै राष्ट्रियान्ताराष्ट्रियसम्मानैः सम्मानिता जाता। येषु केचिदत्रोल्लेखनीयाः।

1988 – पद्मविभूषणम्

1989 – दादा साहब फाल्के पुरस्कारः

1996 – राजीव गांधी सद्भावना पुरस्कारः

1999 – पद्मभूषणम्

2001 – भारतरत्नम् सर्वोच्चनागरिकसम्मानः

**एतदतिरिक्तं, नूरजहाँ, महाराष्ट्रभूषणम् तथा च चित्रपटजगतः अगणितैः पुरस्कारैः सम्मानिता संगीत-साम्राज्ञी लतामंगेशकर राष्ट्रस्य विशिष्टतरा विभूतिः वर्तते। आत्मनः स्वरमाधुर्येण सर्वान् लोकान् चिर-माप्याययन्ती स्वरसाधिका लता दीर्घायुष्ट्वं नैरुज्यं च लभेतेति परमेश्वरं कामये।**

## हिन्दी अनुवाद

74 वर्षों से सम्पूर्ण विश्व को अपने मधुर गानस्वर से सम्मोहित करती हुई, महती साधना से प्राप्य राष्ट्र के सर्वोच्च '**भारतरत्न**' नागरिक सम्मान से सम्मानिता, कोटि कोटि कण्ठो से प्रशंसिता सुश्री लता मंगेशकर संगीत जगत् की अनन्या स्वरसाधिका है। लोक में शायद ही ऐसा कोई व्यक्ति होगा जो लताजी के मधुर स्वर से अभिभूत नहीं है। अपूर्वा पार्श्वगायिका लताजी ने 28 दिसम्बर 1929 ई. में मध्यप्रदेश इन्दौरनगर निवासी पं. दीनानाथ मंगेशकर के यहाँ पुत्री रूप में जन्म ग्रहण किया। संगीत विशारदा लता जी के पिता पं. दीनानाथ मंगेशकर कुशल संगीत प्रशिक्षक एवं अभिनयकला में प्रवीण थे। परिवार के रससिक्त परिवेश में लता जी सहज ही संगीत विद्या में प्रवृत्त हो गई। संगीत प्रशिक्षक पिता की सन्निधि में निरन्तर साधना में संलग्न पुत्री के अलौकिक स्वर माधुर्य को सुनकर पिता अनेक बार चमत्कृत व रोमाञ्चित हो जाते थे। बाल्यावस्था में लता जी की रुचि संगीत के साथ साथ अभिनय कला में भी बढ़ रही थी। जब लताजी सात 7 वर्ष की थी तब उन्होंने मराठी भाषा में विरचित सौभद्रम् नामक नाटक में महर्षिनारद की भूमिका का निर्वाह किया था। इसके अतिरिक्त, बड़ी माँ, जीवनयात्रा, छत्रपति शिवाजी आदि नाटकों में भी लताजी ने प्रशंसनीय अभिनय किया। किन्तु कालान्तर में संगीत को ही अपना कर्मक्षेत्र मानने वाली लताजी का मन संगीत के लिए ही समर्पित हो गया। 1942 ई. में जब लताजी केवल 13 वर्ष की थी तभी लताजी के पिता पं. दीनानाथ जी परिवार में पाँच सन्तान एवं पत्नी को छोड़ कर दिवंगत हो गये। लता जी अपने भाई बहिनों में सबसे बड़ी थीं। ऐसी विषम अवस्था में आर्थिक संकटों से ग्रस्त, अनन्य गतिका लताजी ने अपने पिता के हितैषी मित्र के मार्गदर्शन में चित्रपट के लिए गीत प्रस्तुत किया। लताजी के द्वारा गाया हुआ गीत लोगों के द्वारा मुक्त कंठ से प्रशंसित हुआ। लताजी ने अब संगीत क्षेत्र में नैपुण्य प्राप्त करने के लिए अमानअली खाँ, उस्तादअमान खाँ, पं. तुलसीदास जैसे संगीत मार्तण्डों की सान्निधि में संगीत साधना करते हुए लोक में महती प्रतिष्ठा प्राप्त की। लताजी की सफलता से संतुष्ट समस्त परिवार ने संगीत विद्या को ही अपनी सिद्धि का क्षेत्र चुन लिया। सप्तस्वरों की साधिका लताजी ने राष्ट्र के विख्यात संगीत निर्देशकों के निर्देशन में गीत प्रस्तुत किये हैं। मोहम्मद रफी, किशोरकुमार, मुकेश जैसे लोकप्रिय गायकों के साथ लताजी ने अनेक गायन प्रस्तुत किये है। प्रायः अनेक क्षेत्रीय भाषाओं में गीत प्रस्तुत करना आसान नहीं होता है। किन्तु बहुमुखी प्रतिभासम्पन्ना लताजी ने सभी भाषाओं में सहज एवं निर्बाध गति से असंख्य गीतों की प्रस्तुति की है। राष्ट्र में मनाये जाने वाले प्रमुख पर्वो पर आधारित अनेक सरस एवं भावपूर्ण गीत गाकर लता जी ने जनरञ्जन किया है। संगीत पर संगीत विशारदा लताजी का पूर्णअधिकार है। संगीत जगत् के लब्ध प्रतिष्ठ कुंदनलाल सहगल, बड़े गुलाम अली, भीमसेन जोशी, सलामत, नजाकत जैसे महान् संगीतकार लताजी के आदर्श हैं। स्वरसाम्राज्ञी लता जी ने विश्व की 20 भाषाओं में 50,000 (पच्चास हजार) गीत प्रस्तुत किए हैं। 1962 ई. में भारत चीन देश के बीच होने वाले युद्ध में शहीद हुए देशभक्त सैनिकों के सम्मान में आयोजित श्रद्धाञ्जलि महोत्सव के अवसर पर स्वरसाधिका लताजी का भावपूर्ण गीत सुनकर वहाँ उपस्थित जन समूह के साथ-साथ प्रधानमंत्री जवाहरलाल नेहरू भी रो पड़े थे। उत्कृष्ट गायिका लताजी राष्ट्र भक्ति परायणा संवेदनशीला, आजीवन परिवार के लिए समर्पिता आदर्श महिला है। अपनी उत्कृष्ट उपलब्धियों के लिये स्वरसाम्राज्ञी लताजी समय-समय पर अगणित राष्ट्रीय एवं अन्तर्राष्ट्रीय पुरस्कारों से सम्मानित हुई है। जिनमें से कुछ अतिविशिष्ट सम्मान यहाँ उल्लेखनीय हैं-

1988 - पद्मविभूषण सम्मान
1989 - दादा साहब फाल्के पुरस्कार
1996 - राजीव गांधी सद्भावना पुरस्कार
1999 - पद्मभूषण सम्मान
2001 - भारतरत्न सर्वोच्च नागरिक सम्मान

इसके अतिरिक्त नूरजहाँ, महाराष्ट्रभूषण एवं चित्रपट जगत् के अगणित पुरस्कारों से पुरस्कृत संगीत साम्राज्ञी लताजी राष्ट्र की अतिविशिष्ट विभूति हैं। स्वरसाधिका लताजी स्वस्थ एवं नीरोग रहे यही परमेश्वर से कामना है।

आयुर्वेद-स्तम्भः

# यमदंष्ट्रा स्वसा प्रोक्ता

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**आयुर्वेदे स्वस्थवृत्तौ रोगाणां समुत्पत्तौ च त्रिदोषस्यातिशयेन महत्त्वं प्रतिपादितम्। एतेषां त्रयाणां दोषाणां सञ्चय-प्रकोप-प्रसरात्मिका त्रिविधा अवस्था कालप्रभावात् स्वयमेव सम्भवति। यथा हि ग्रीष्मे वायुः सञ्चीयते, वर्षाकाले प्रकुप्यति तथा शरत्काले कालप्रभावादेव वायोः प्रशमनं भवति। एवमेव शरीरे वर्षासु चीयते पित्तं शरत्काले प्रकुप्यति, हेमन्ते तत्प्रशाम्यति। इत्थमेव हेमन्ते चीयते श्लेष्मा वसन्ते च तस्य प्रकोपो भवति ग्रीष्मे तु संशमनं भवति श्लेष्मणः। अस्मादेव हि कारणादायुर्वेदे ऋतुचर्यायाः परिपालनस्य विशेषेण निर्देशो वर्तते। ये हि ऋतुचर्यायाः परिपालनं कुर्वन्ति तान् ऋतुजन्याः विकाराः न पीडयन्ति। अन्ये तु सामान्यतया रोगेभ्यः पीडिताः भवन्ति।**

आयुर्वेद में स्वस्थवृत्ति में और रोगों की उत्पत्ति में त्रिदोष का अत्यधिक महत्त्व प्रतिपादित किया गया है। इन तीनों दोषों का सञ्चय, प्रकोप और प्रसर स्वरूपक त्रिविध अवस्था काल  के प्रभाव से स्वयं ही होती है। जैसे ग्रीष्म में वायु सञ्चित होती है तथा वर्षाकाल में प्रकुपित होती है और शरत्काल में काल के प्रभाव से वायु का शमन होता है। इसी तरह शरीर में वर्षा में पित्त सञ्चित होता है तथा शरत्काल में प्रकुपित होता है और वह पित्त हेमन्त में प्रशमित हो जाता है। इसी प्रकार (शरीर में) हेमन्त में श्लेष्मा सञ्चित होता है और वसन्त में उसका प्रकोप होता है तथा श्लेष्मा का ग्रीष्म में शमन हो जाता है। इसी कारण से आयुर्वेद में ऋतुचर्या के परिपालन का विशेषरूप से निर्देश है। जो लोग ऋतुचर्या का परिपालन करते हैं उनको ऋतुजन्य विकार पीडित नहीं करते हैं। अन्य (जो इसका परिपालन नहीं करते वे) सामान्यतया रोगों से पीड़ित होते है।

**वर्षासु प्रकुपितः वातः विविधैः रोगैः जनान् पीडयति, तद्वदेव हि शरदि पित्तजन्याः विकाराः प्रादुर्भवन्ति, वसन्ते तु कफजन्याः भवन्ति विकाराः। सर्व एवैते प्रकुपिताः दोषाः स्वे स्वे काले विशेषेण क्रुद्धीभूताः रोगानुत्पादयन्ति पीडयन्ति च जनान्। कालेष्वेतेषु विशेषरूपेण शारदीयाः वासन्तिश्चकाश्च रोगा आधिक्येन कष्टदायिनः भवन्ति। अधिसंख्या-काश्च जनाः यदा रोगैः पीडिताः भवन्ति तदा वैद्याः कष्टमोचकाः सन्तीति मत्वा तान् प्रति द्रुवन्त्यत एव शरदि वसन्ते च वैद्या अधिकाः व्यस्ताः भवन्ति। दृष्ट्वा त्विदं कश्चित्कविः व्यङ्ग्योक्तिं करोति-**

**वैद्यानां शारदी माता पिता च कुसुमाकरः।**
**यमदंष्ट्रा स्वसा प्रोक्ता, हितभुङ्मितभुङ् रिपुः।।**

वर्षा मे प्रकुपित वात विविध रोगों के द्वारा लोगों को पीड़ित करता है, उसी तरह शरद् में पित्तजन्य विकार उत्पन्न होते हैं, वसन्त में तो कफजन्य विकार होते हैं। ये सभी प्रकुपित दोष अपने-अपने काल में विशेषरूप से कुद्ध हुए रोगों को उत्पन्न करते हैं और लोगों को पिड़ित करते हैं। इन कालों में विशेषरूप से शरद् में होने वाले और वसन्त में होने वाले रोग अधिकता से कष्ट देने वाले होते हैं। अधिकांश लोग जब रोगों से पीड़ित होते हैं तब वैद्य कष्ट दूर करने वाले होते हैं यह मानकर उनकी ओर दौड़ते हैं इसलिए शरद् में और वसन्त में वैद्य अधिक व्यस्त होते हैं यह देखकर कोई कवि व्यङ्ग्योक्ति करता है -

शरद् ऋतु वैद्यों की माता है और वसन्त पिता है तथा यमदंष्ट्रा को बहन कहा गया है, इन ऋतुओं में जो स्वल्प भोजन (संयम से भोजन और रहन-सहन) करता है वह जीवित रहता है (अर्थात् स्वस्थ रहता है)।

**शरदि विशेषेण प्रकुपितेन पित्तेन ज्वरोत्पत्तिर्भवति। प्राचीनकाले तु शरदि समुत्पन्नानां बहुविधानां ज्वराणां समावेशः 'प्राकृतज्वरः' इति सम्बोधन एव कृतः, किन्तु वर्तमानकाले तु डेंग्यू-मलेरिया-वायरल-स्क्रब टाइफस इत्यादिभिः विविधैः सम्बोधनैः सम्बोधितानां पृथक्-पृथक् लक्षणात्मकानां ज्वराणां निदानं कृत्वा तदनुरूपमेव चिकित्सां कुर्वन्ति चिकित्सकाः। शरदि विविधैर्ज्वरैः बहुसंख्यकाः जनाः पीडिताः भवन्ति, एषः**

**रोगोत्पत्तिक्रमः शरदः उत्तरकालपर्यन्तं हेमन्तस्य च प्राथमिकं किञ्चित्कालपर्यन्तं प्रचलति। अत एवास्मिन्नपि काले दिवसे सूर्यांशुभिः सन्त्रस्तः जनः रात्रौ स्वल्पप्रभावात्मकेन शीतेन सन्त्रस्तो भवति। अत्र त्वनवधानता विशेषेण रोगकारिका भवति। विशिष्टे ह्यस्मिन् काले जनाः प्रतिश्याय-श्वास-कास-ज्वरादिभिश्च पीडिताः भवन्ति। एषः कालोऽपि वैद्यानां व्यवसायात्मकानां कृते ऽनुकूलो वर्ततेऽत एव हि कविना प्रोक्तं 'यमदंष्ट्रा स्वसा प्रोक्ता'। स्वसापि सर्वदा भ्रातॄणां हितकारिणी भवति। एषा यमदंष्ट्रा वैद्यानां हितकारिणी वर्तते। यमदंष्ट्रा कस्याः संज्ञा वर्तते इति तु शार्ङ्गधरेण स्पष्टीकृतम्, यथा-**

**कार्तिकस्य दिनान्यष्टावष्टावाग्रहायणस्य च।**
**यमदंष्ट्रा समाख्याता स्वल्पभुक्तो हि जीवति।।**

**( शार्ङ्गधर )**

**प्रारम्भिके कार्तिके तु शीतस्य विशिष्टः प्रभावो न भवति किन्तु कार्तिकस्यान्तिमेषु दिवसेषु मार्गशीर्षस्य च प्रारम्भे सहसा शीतोऽभिवर्धते। अनवधानोऽनभ्यस्तो हि जनः कार्तिकस्य स्वल्पशीताभ्यस्तः सः ऋतु-परिवर्तनजन्यैः रोगैः प्रपीडितो भवति। अस्मिन् काले स्वल्पभुक्तः सावधानः जनः रोगैः पीडितो न भवति।**

शरद में विशेष रूप से प्रकुपित पित्त से ज्वरोत्पत्ति होती है। प्राचीनकाल में तो शरद् में उत्पन्न अनेक ज्वरों का समावेश 'प्राकृतज्वर' इस सम्बोधन में ही कर लिया गया है, किन्तु वर्तमानकाल में तो डेंग्यू, मलेरिया, वायरल, स्क्रप टाइफस इत्यादि विभिन्न सम्बोधनों से सम्बोधित पृथक्-पृथक् लक्षणों वाले ज्वरों का निदान करके चिकित्सक उसके अनुरूप ही चिकित्सा करते हैं। शरद् ऋतु में अनेक प्रकार के ज्वरों से लोग अधिक संख्या में पीड़ित होते हैं, यह रोगोत्पत्तिक्रम शरद् के उत्तरकाल तक और हेमन्त के प्रारम्भिक कुछ समय तक चलता रहता है। इसलिए इस समय में भी दिन में सूर्य की किरणों से सन्त्रस्त व्यक्ति रात में थोड़ी-थोड़ी पडने वाली ठण्ड से पीडित होता है। इसलिए असावधानी विशेषरूप से रोग करने वाली होती है। इस विशिष्ट समय में लोग जुकाम, श्वास, कास, और ज्वर आदि से पीड़ित रहते हैं। यह काल भी व्यवसाय में लगे वैद्यों के लिए अनुकूल होता है, इसीलिए कवि ने कहा है- 'यमदंष्ट्रा (वैद्यों की) बहन कही गई है'। बहन भी सदा भाईयों का हित करने वाली ही होती है। यह यमदंष्ट्रा वैद्यों का हित करने वाली होती है। यमदंष्ट्रा किसकी संज्ञा है, ऐसा तो शार्ङ्गधर ने स्पष्ट किया है-

**कार्तिक मास के आठ दिन और मार्गशीर्ष के आठ दिन इनको यमदंष्ट्रा कहा गया है, इसमें कम खाने वाला ( भोगों को कम भोगने वाला ) ही जीवित रहता है।**

**( शार्ङ्गधर )**

प्रारम्भिक कार्तिक में तो शीत का विशिष्ट प्रभाव नहीं होता है, किन्तु कार्तिक के अन्तिम दिनों में और मार्गशीर्ष के प्रारम्भ में शीत सहसा बढ़ता है। असावधान और अनभ्यस्त व्यक्ति जो कि कार्तिक के स्वल्प शीत का अभ्यस्त है वह ऋतुपरिवर्तनजन्य रोगों से प्रपीडित होता है। इसमें स्वल्प-भुक्त और सावधान व्यक्ति रोगों से पीड़ित नहीं होता है।

**कालेऽस्मिन् विधिपूर्वकं विरेचनं कर्तव्यमथवा सुखविरेचनं तु कर्तव्यमेव। दिनत्रयपर्यन्तं घृतपूरितां कृशरां भुक्त्वा चतुर्थे दिने स्वेदनं विधाय रात्रौ पञ्चसकार-तरुणीकुसुमाकरशिवाक्षारपाचन-मञ्जिष्ठादीत्येतानि चूर्णानि जनस्याग्निबलं समीक्ष्य प्रयोक्तव्यानि। केवलस्य कस्यचिदेकस्यैव चूर्णस्य ग्रामत्रयपरिमितायां मात्रायामुष्णोदकेन प्रयोगः करणीयः। एवं निरन्तरं दिनत्रयपर्यन्तं कस्यचिदप्यु-पर्युक्तस्यैकस्य चूर्णस्य प्रयोगेण सुखं विरेचनं भवति। उपर्युक्तानां चूर्णानां प्रयोगो निरापदो वर्ततेऽतएव वैद्यस्य परामर्शं विनाऽप्येतेषां प्रयोगः सुखावहः। पञ्चकर्माङ्ग-भूतस्य विरेचनकर्मणः प्रयोगस्तु विशेषेण लाभदायी वर्तते। किन्त्वस्य प्रयोगो बह्वतिकर्त-व्यतायोगात्मकः वर्ततेऽत एव चिकित्सकस्य सान्निध्यं विनाऽस्य प्रयोगो न कदापि करणीयः।**

इस समय विधिपूर्वक विरेचन करना चाहिए अथवा सुखविरेचन तो करना ही चाहिए। तीन दिन तक घृतयुक्त खिचडी खाकर चौथे दिन स्वेदन करके रात्रि में पञ्चसकार, तरुणीकुसुमाकर, शिवाक्षारपाचन अथवा मञ्जिष्ठादि चूर्ण इत्यादि चूर्णों को व्यक्ति का अग्निबल देखकर प्रयुक्त करना चाहिए। केवल किसी एक ही चूर्ण का तीन ग्राम की मात्रा

में उष्णोदक से प्रयोग करना चाहिए। इस तरह निरन्तर तीन दिन तक उपर्युक्त किसी एक चूर्ण के प्रयोग से सुख विरेचन हो जाता है। उपर्युक्त चूर्णो का प्रयोग निरापद होता है, इसलिए वैद्य के परामर्श के बिना भी इसका प्रयोग सुखकर होता है। पञ्चकर्म के अन्तर्गत आने वाले विरेचन कर्म का तो प्रयोग विशेषरूप से लाभदायी होता है। किन्तु इसका प्रयोग अधिक इतिकर्तव्यताओं (ताम-झाम, विभिन्न प्रक्रियाओं) से युक्त है अत एव चिकित्सक के सान्निध्य (देख-रेख) के बिना इसका प्रयोग कभी भी नहीं करना चाहिए।

**कालेऽस्मिन् निम्नलिखितेषु क्वाथेषु कस्यचिदेकस्य क्वाथस्य प्रयोगः षोडशदिवसपर्यन्तं करणीयः। ते हि- लघुमंजिष्ठादिक्वाथः, अमृताष्टकः क्वाथः, कण्टकार्या-दिक्वाथः। एतेषां घटकानां गुणानाञ्च वर्णनं विधीयते। यथा- लघु-मञ्जिष्ठादिक्वाथः- मञ्जिष्ठा, हरीतकी, विभीतकी, आमलकी, कुटकी, वचा, दारूहरिद्रा, अमृता निम्बत्वगित्येतेषां नवसंख्यकानां द्रव्याणां सममात्रायां ग्रहणं कृत्वा यवकुटरूपेण (यवपरिमिताकारेण) क्षोदनं कृत्वा विंशतिग्रामपरिमितायां मात्रायां ग्रहणं कृत्वा क्वाथविधिना क्वाथो विधेयः। अस्यैककालिकः द्विकालिको वा प्रयोगः यमदंष्ट्राकाले स्वास्थ्यस्य संरक्षणं करोति। क्वाथोऽयं शोधनं करोति पित्तशमनमपि करोति। आन्त्रे संसक्तस्य मलस्य निर्हरणं करोति। आमवात-वातरक्त-पामा-कुष्ठादीनां वारणं निवारणञ्च करोति। 'नवकार्षिकक्वाथ'-संज्ञयापि व्यवह्रियत एष क्वाथः।**

इस समय निम्नलिखित क्वाथों में से किसी एक क्वाथ का प्रयोग सोलह दिन तक करना चाहिए। ये क्वाथ हैं- लघुः मञ्जिष्ठादि क्वाथ, अमृताष्टक क्वाथ, कण्टकार्यादि क्वाथ। इनके घटकों का और गुणों का वर्णन किया जा रहा है, यथा- लघु मञ्जिष्ठादि क्वाथ - मंजीठ, हरड़, बहेड़ा, आँवला, कुटकी, वचा, दारुहरिद्रा, गिलोय और नीम की अन्तर्छाल इन नौ द्रव्यों को समान मात्रा में लेकर जौ-कुटके रूप में (जौ जितने टुकड़ों के रूप में) कूट कर 20 ग्राम की मात्रा में लेकर क्वाथ बनाने की विधि से क्वाथ बनाना चाहिए। इसका दिन में एक बार या दो बार प्रयोग यमदंष्ट्रा के समय में करने पर यह स्वास्थ्य का संरक्षण करता है। यह क्वाथ शोधन करता है और पित्त का शमन भी करता है। आँतों में चिपके हुए मल को निकालता है। आमवात, वातरक्त, पामा और कुष्ठादि से बचाव और उनका निवारण करता है। 'नववार्षिक क्वाथ' इस संज्ञा से भी यह क्वाथ व्यवहृत किया जाता है।

**अमृताष्टकः क्वाथ :-**

**अमृता, निम्बत्वक्, कुटकी, मुस्तकम्, इन्द्रयवः, शुण्ठी, पटोलपत्राणि, रक्तचन्दनश्चैतेषामष्ट-संख्याकानां द्रव्याणां सममात्रायां ग्रहणं कृत्वा क्वाथरूपे कुट्टनं विधेयम्। विंशतिग्रामात्मको गृहीतो ह्येषः क्वाथविधिना पीतः पित्तप्रशमनं करोति। अरुचि-दाह-तृषादीनां निवारको ह्योष क्वाथः ज्वरघ्नोऽपि वर्तते।**

**कण्टकार्यादिक्वाथः -**

**कण्टकारिका, बृहती, शुण्ठी, धान्यकं देवदारु-चैतेषां पञ्चद्रव्याणां क्वाथं विधाय प्रतिदिनं वारद्वयं पातव्यम्। अनेन कासस्य, श्वासस्य च निबर्हणं भवति, प्रतिश्यायेऽपि लाभप्रद एषः क्वाथः नूतने ज्वरे दोषपाचको भवति। शार्ङ्गधरसंहितायां प्रोक्तस्यास्य क्वाथस्य 'नागरादिपाचनम्' इत्यपि संज्ञा वर्तते।**

**अमृताष्टक क्वाथ-**

गिलोय, नीम की अन्तर्छाल, कुटकी, नागरमोथा, इन्द्र जौ, सोंठ, परवल के पत्ते और लाल चन्दन इन आठ द्रव्यों को समान मात्रा में लेकर क्वाथ के रूप में कूटना चाहिए। 20 ग्राम की मात्रा में लिया गया यह क्वाथ विधिपूर्वक पिया गया पित्त का प्रशमन करता है। अरुचि, दाह और तृषा आदि का निवारण करने वाला यह क्वाथ ज्वरघ्न भी है।

**कण्टकार्यादि क्वाथ -**

छोटी कटेरी, बड़ी कटेरी, सौंठ, धनिया और देवदारु इन पाँच द्रव्यों का क्वाथ बना कर प्रतिदिन दो बार पीना चाहिए। इससे कास का और श्वास का निवारण होता है, जुकाम में भी लाभप्रद यह क्वाथ नवज्वर में दोषों का पाचन करने वाला होता है। शार्ङ्गधरसंहिता में कहे गए इस क्वाथ की 'दोषपाचन' यह संज्ञा भी है।

**८०, सेनापति हाऊस के पीछे, प्रेमनगर,**
**झोटवाड़ा, जयपुर**

संस्कृतसमाचारः

# श्रीवैदिक-संस्कृति-संघायोजनम्





श्रीवैदिक-संस्कृति-प्रचारक-संघ-जयपुर-द्वारा स्वकीये एकषष्टितमे वर्षे सितम्बरमासस्य षष्ठे दिवसे 06-09-2016 तमे दिनाङ्के विद्वत्सम्माननं कृत्वा ऋषिपञ्चम्याः पर्व समायोजितम्। समारोहेऽस्मिन् चत्वारिंशतो बालकानाम् उपनयनसंस्कारो जातः। कार्यक्रमेऽस्मिन् पद्मश्री डॉ. मण्डनमिश्रसम्मानेन डॉ. जया दवे महोदया सम्मानिता। वैदिकशिवदत्तजोशी सम्मानेन पं. अश्विनी चतुर्वेदी विभूषितः। पं. नवलकिशोर-कांकर-संस्कृतशास्त्रसम्मानेन प्रो. शिवकान्तझावर्यः विभूषितः। पं. रामप्रपन्नशर्माव्याकरण शास्त्रसम्मानेन डॉ. विष्णुकान्तपाण्डेयवर्यः विभूषितः। पं. गङ्गासहायजोशीधन्वन्तरि-आयुर्वेदसम्मानेन डॉ. सुशीलाशर्ममहोदया विभूषिता। पं. मोहनलाल-शर्मपाण्डेयसम्मानेन पं. प्यारेमोहनशर्ममहोदयः विभूषितः। पं. राधेश्यामव्याससमाजसेवासम्मानेन पं. पंकज पचलंगियावर्यः विभूषितः। ज्योतिष-सम्मानेन श्रीरमेशचन्दशर्मवर्यः, विप्रश्रीसम्मानेन पं. मोहनप्रकाश-शर्मवर्यः, श्रीमती कमलादेवीसम्मानेन श्रीश्यामलालशर्मा जौहरीवर्यः, पं. ईश्वरचन्द्रशास्त्री-सम्मानेन श्री अंशुमानशास्त्रविर्यः, ब्रह्मश्रीसेवा-सम्मानेन श्रीबाला-सहायशर्ममहोदयश्च अलङ्कृतः। नवोदितप्रतिभा-सम्मानेन सुश्रीहर्षाशर्ममहोदया अलङ्कृता। पं. रामसहायपुजारी-सम्मानेन श्री ओङ्कारप्रसादशर्मवर्योऽलङ्कृतः। श्रीमती लाढादेवी सम्मानेन श्रीमती शान्तिशर्म-महोदया विभूषिता।

समारोहेऽस्मिन् सार्वजनिक-प्रन्यासमण्डलस्य सभापतिना श्री एस.डी. शर्ममहोदयेन, गौड़ब्राह्मण-महासभायाः प्रदेशाध्यक्षेण विजयकुमार हरितवाल-महोदयेन च संस्कारवन्तो जनाः स्युरित्युपरि बलं दत्तम्। सम्पूर्णस्यापि कार्यक्रमस्य अध्यक्षपदं प्रो. ताराशंकरपाण्डेयमहोदयेन अलङ्कृतम्। तेन स्वकीय-अध्यक्षीयभाषणे उक्तं यदस्माकं भारतदेशः ऋषीणां मुनीनां देशो वर्तते। अस्माकम् ऋषयो मन्त्रद्रष्टारः सन्ति। तेषां वचांसि अस्माभिरनुपालनी-यानि सन्ति। वेदस्योपरि अस्माभिः बलं प्रदातव्यम्। यतो हि वेदा अस्माकं निधयः सन्ति। कार्यक्रमस्य आयोजनं कनकवृन्दावने जातम्।

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**

विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**


**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011-47642000 से 30 फैक्स: 011-47642015 E-mail: circ@pbdl.in

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17




स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,